श्रीजगदम्बिकायै नमः

जय
श्री गुरुदेव

जय ईश्वरि

[illegible]

March / May 1997


O Consort of SHIVA, grace my miserable self too, in spite of my being far removed from THEE

[illegible]

श्री

अम्बा

अक़र





JANUARY 1997

We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th
01	02	03	04	05	06	07	08	09	10	11	12	13	14	15	16

Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa
17	18	19	20	21	22	23	24	25	26	27	28	29	30	31	✧

1. प्रातः नीन्द से उठते ही दोनों हाथों की हथेलियों को देखते हुये पढ़ें

करागे्र वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते कर दर्शनम् ॥

समुद्र वसने देवि पर्वतस्तनं मण्डिते ।
विष्णु पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्वमे ॥

2. स्नान करने से पहले बायां पैर धोते हुए पढ़ें

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपद्माक्षि-शिरोरु बाहवे ! सहस्र नाम्ने पुरुषाय शाश्वते, सहस्रकोटी युगधारिणे नमः ।

- दायाँ पैर धोते हुए पढ़ें :- ॐ नम कमलनाभाय-नमस्ते जल शायिने ! नमस्ते केशवानन्त-वासुदेव नमोस्तुते !

- मुंह धोते हुए पढ़ें : गंगा प्रयाग गयनै ~~मिष पुष्करसै~~ मिष पुष्करादि तीर्थानि यानि भुवि सन्ति हरिप्रसादात आयान्तु तानि करपद्मपुटे मदीये प्रक्षालयन्तु वदनस्य निशाकलंकम् । तीर्थे स्नेयं तीर्थमेव समानानां भवति मा नः शंस्यो अररुषो धूर्ति प्राणङ्‌ मर्त्यस्य रक्षाणो ब्रह्मणस्पते

IMP. NOTES

- मुंह धोकर यज्ञोपवीत धोते हुए तीन बार पढ़ें

ॐ गायत्र्यै नमः। ॐ भूर्भुवः स्वः तत्सवितुर
वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात ॥

- यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत सहजं पुरस्तात
आयुष्मन अग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलम्
अस्तु तेजः। यज्ञोपवीतं असि यज्ञस्यत्वा उपवीतेन
उपनह्यामि ॥

- पूजा आरंभ

प्रातः स्मरामि गणनाथं अनाथ बन्धुं
सिन्दूर पूरपरि शोभित गण्ड युग्मम् ।
उद्दण्ड विघ्न परिखण्डन चण्ड दण्डम्
आखण्ड लादि सुरनायक वृन्द वन्द्यम् ॥

प्रातः स्मरामि भवभीति महार्ति नाशं
नारायणं गरूड़ वाहनम अब्जनाभम ।
ग्राहाभिभूत वर वारण मुक्ति हेतुं
चक्रायुधं तरूण वारिज पत्र नेत्रम ॥

प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधारं वृषभ वाहनम अम्बिकेशम् ।
खटवाङ्गा शूल वरदा भय हस्तम ईशं
संसार रोगहरम औषधम अद्वितीयम् ॥

ब्रह्मा मुरारी: त्रिपुरान्तकारी, भानु: शशी
भूमिसुतो बुधश्च। गुरुश्च शुक्र: शनि
राहु केतव: कुर्वन्तु सर्वे मम सु प्रभातम् ॥

भृगु: वसिष्ठ: क्रतु: अङ्गिराश्च मनु:
पुलस्त्य: पुलहश्च गौतम:। रैभ्यो मरीचि:
च्यवनश्च दक्ष: कुर्वन्तु सर्वे मम सु प्रभातम्

ॐ श्री गणेशाय नम:

शुक्लाम्बरधरं . . . . .

बिभ्रत दक्षिण हस्तपद्म युगले दन्ताक्षसूत्रे शुभे,
वामे मोदक पूर्णपात्र परशु नागो प्रवीति त्रितूक।
श्रीमान् सिंहयुगासन: क्षतियुगे शंखो वहन मौलिमान्।
दिश्यात ईश्वरपुत्र ईशो भगवान लम्बोदर: शर्म न: ॥

सिन्दूर कुंकुम हुताशन विद्रुमार्क
रक्ताब्ज दाडिम निभाय चतुर्भुजाय ।
हेरम्ब भैरव गणेश्वर नायकाय
सर्वार्थसिद्धि फलदाय गणेश्वराय ॥

प्रथमं वक्रतुण्डं तु चैकदन्तं द्वितीयकम
तृतीयं कृष्णपिंगं तु चतुर्थं च कपर्दिनम
लम्बोदरं पंचमं तु षष्ठं विकटम एव च
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमं
नवमं भालचंद्रं तु दशमं तु विनायकम
एकादशं गणपतिं द्वादशं मन्त्र नायकम्

IMP. NOTES

सुमुखश्चैक-दन्तश्च कपिलो गजकर्णकः
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ।
धूम्रकेतु गणाध्यक्षो भालचन्द्रो गजाननः
द्वादशै स्तानि नामानि गणेशस्य महात्मनः
य पठेत श्रृणुयात वापि स लभेत सिद्धिम
उत्तमाम । विद्यारम्भे विवाहे च प्रवेशे निर्गमे
तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।।

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलिं बन्धने
स्रष्टुं वारिरुहोद्भवेन विधिना शेषेण धर्तुं धराम ।
पार्वत्या महिषासुर प्रमथने सिद्धाधिपैर्मुक्तये
ध्यातः पन्चशरेण लोक विजये पायात्सनागाननः ।।

देवं सथूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
विघनेशं मदगन्धलोलमधुपव्यालोलगण्डस्थलं
दन्ताघातविदारिताहतजनं सिन्दूरशोभाकरम्
वन्दे शैलसुतासुतं गणपति सिद्धिप्रदं कामदम ।।

एकदन्तं महाकायं लम्बोदरं गजाननम ।
विघ्ननाशकरं देवं हेरम्बं प्रणमाम्यहम् ।।

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ।।

IMP. NOTES

ॐ श्री गणेशाय नमः

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् प्रसन्न
वदनं ध्यायेत् सर्वविघ्नोपशान्तये ।अभिप्रीतार्थ
सिद्ध्यर्थं पूजितो यः सुरैर् अपि सर्वविघ्नच्छिदे
तस्मै श्री गणाधिपतये नमः ।

बिभ्रत् दक्षिण हस्तपद्म युगले दन्ताक्षसूत्रे शुभे
वामे मोदक पूर्णपात्र परशु नागो पवीती त्रिदृक्
श्रीमान सिंहयुगासनः श्रुतियुगे शंखौ वहन मौलिमान्
दिश्यात् ईश्वरपुत्र ईश भगवान् लम्बोदर शर्म नः ॥

देवं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
विघ्नेशं मदगन्धलोलमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारिताहितजनं सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥

—.—

AY

JANUARY 1997

Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	Su	Mo	Tu	We	Th	Fr	Sa	
05	06	07	08	09	10	11	12	13	14	15	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31		✧

गुरु स्तुति

गुरु ब्रह्मा गुरु विष्णो गुरु साक्षात महेश्वरः
गुरु एव जगत सर्वं तस्मै श्री गुरुवे नमः ।
वन्देहं सच्चिदानन्दं भेदातीतं जगद् गुरुम्
नित्यं पूर्णं निराकारं निर्गनं सर्व संस्थितम ॥

परात्परतरं ध्येयं नित्यम आनन्दकारणम ।
नमामि सद् गुरुं शान्तं प्रत्यक्षं शिवरूपिणम ।

अपने गुरु देव की पुजा

- - -
- - -

हरौ रुष्टे गुरुस्त्राता गुरु रुष्टे न कश्चन
सर्वदेव स्वरूपाय तस्मै श्री गुरुवे नमः ।

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम्
बिन्दु नादकलातीतं तस्मै श्री गुरवे नमः ।

शिष्यानां मोक्षदानाय लीलया देहधारिणे
सदेहेपि विदेहाय तस्मै श्री गुरवे नमः ।

ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम

IMP. NOTES

पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्याम उपर्यधः
सदामत् चित्तिरूपेण विधेहि भवदासनम्

ॐ नमो भवान्यै

भक्तानुग्रहकारिणी भगवती देवाधिदेवेश्वरी
दीनानाथकृपावती स्वजननी भक्तानुरक्ता सती ।
ॐकाराक्षरवासिनी सुरनुता सर्वेश्वरी सर्वदा
भूयात्नो वरदा सदा ह्यभयदा कामेश्वरी कामदा ॥

माता भवानी च पिता भवानी बन्धुर्भवानी च
गुरूर्भवानी । विद्या भवानी द्रविणं भवानी यतो
यतो यामि ततो भवानी ॥

या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना
या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रान्विता ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता सामां
पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

या श्रीर्वेदमुखी तपः फलमुखी नित्यं च निद्रामुखी
नानारूपधरी सदा जयकरी विद्याधरी शंकरी ।
गौरी पीनपयोधरी रिपुहरी मालास्थिमालाधरी

सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

या देवी शिवकेशवादिजननी यावै जगद्रूपिणी
या ब्रह्मादिपिपीलिकान्तजनतानन्दैकसंदायिनी ।
या पञ्चप्रणमन्निलिम्पनयनी या चित्कलामालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥

या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धलक्ष्मीः परा
सा देवी नवकोटिमूर्त्तिसहिता मां पातु माहेश्वरी ॥

या खड्गं डमरू त्रिशूल परशु खट्वाङ्गपाशौ गदां
चक्रं मुद्गरचापबाणवरदाभीती: कपालाङ्कुशौ ।
धत्ते तोमरपुस्तके च मुसलं दोर्भिर्दशाष्टाष्टभिर्देवीभिः
परिवारिता शशिधरा सा शारिका पातु नः ॥

बीजैः सप्तभिरूज्जवलाकृतिरसौ या सप्तसप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् ।

काशमीरप्रवेरशमध्यनगरीप्रद्युम्नपीठे स्थिता
देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः ॥
ब्रह्माणं च पुरन्दरं शिवहरी देवान्समस्तान्मुनीन्
या दृष्ट्या दयया विलोकयति सा देव्यम्बिका पार्वती ।
चक्रस्था निजबोधभासितजगच्छान्तात्मिका
सर्वगा सान्द्रानन्दप्रदा भगवती पायात्सदाशारिका ॥
भक्तानां सिद्धिदात्री नलिनयुगकरा श्वेतपद्मासनस्था
लक्ष्मीरूपा त्रिनेत्रा हिमकरवदना सर्वदैत्येन्द्रहन्त्री ।
वागीशी सिद्धिकर्त्री सकलमुनिजनै सेविता
या भवानी नौम्यहं नौम्यहं त्वां हरिहरप्रणतां शारिकां नौमि नौमि ।
आरक्ताभां त्रिनेत्रां मणिमुकुटवतीं रत्नताटङ्करम्यां
हस्ताम्भोजैः सपाशाङ्कुशमदनधनु सायकैर्विस्फुरन्तीम् ।
आपीनोत्तुङ्गवक्षोरुहतटविलुठत्तारहारोज्ज्वलाङ्गी
ध्यायाम्यम्भोरुहस्थामरुणविवसनामीश्वरीमीश्वराणाम् ॥

ज्वालापर्वतसस्थितां त्रिनयनां पीठत्रयाधिष्ठितां
ज्वालाडम्बरभूषतां सुवदनां नित्यामदृश्यां जनैः ।
षट्चक्राम्बुजमध्यगां वरगदाम्भोजाभयान्विभ्रतीं
चिद्रूपां सकलार्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥
संसारार्णवतारिणीं रविशशिकोटिप्रभां सुप्रभां
पापातङ्कनिवारिणीं हरिहरब्रह्मादिभिः संस्तुताम् ।
दारिद्रस्य विनाशिनीं सुकृतिनां जाड्यं हरन्तीं भृशम-
ज्ञानान्धमतेः कवत्वजननीं ज्वालामुखीं नौम्यहम् ॥
सैन्यानां महिषासुरस्य मृतिदां सिंहाधिरूढामुमां
नानाकारविशेषसौख्यजननीं देहान्तरैः संस्थिताम् ।
बालामध्यमवृद्धरूपरमणीं श्री सुन्दरीं वैष्णवीं
स्त्रीरूपेण जगद्विमोहनकरीं ज्वालामुखीं नौम्यहम् ॥
ज्वालामुखि महाज्वाले ज्वालापिंगललोचने ।
ज्वालातेजे महातेजे ज्वालामुखि नमोस्तुते ॥
नमो भगवति ज्वाले कालि त्रिपुरसुन्दरि ।

सर्वबीजपालयन्ति ज्वालामुखि नमोस्तु ते ॥

आकाशे चण्डिका देवी पाताले भुवनेश्वरी ।

मर्त्यलोके जयादेवी पायात्त्रिपुरसुन्दरी ॥

प्रातः काले कुमारी कुमुदकलिकया जप्यमालां जपन्ती

मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा विशाला ।

सन्ध्यायां वृद्धरूपा गलितकुचयुगे मुण्डमालां वहन्ती

सादेवी दिव्यदेहा हरिहरनमिता पातु नो ह्यादिमुद्रा ॥

या द्वादशार्कपरिमण्डितमूर्तिरेका

सिंहासनस्थितिमतीमुरगैर्वृतां च ।

देवीमनक्षगतिमीश्वरतां प्रपन्नां

तां नौमि भार्गवपुषीं परमार्थराज्ञीम ॥

उद्यद्दिवाकरसहस्त्ररुचिं त्रिनेत्रां

सिंहासनोपरि गतामुरगोपवीताम ।

खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां

राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥

श्री पञ्चकल्याणक

लघुस्तवः

नमस्त्रिपुरसुन्दर्यै ॥

ऐन्द्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषाऽसौ त्रिपुरा हृदि द्यु तिरिवोष्णांशोः सदाहः स्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥१॥

या मात्रा त्रपुसीलतातनुलसत्तन्तुस्थिति स्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति विश्वजनन व्यापार बद्धोद्यमा
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननी गर्भेऽर्भकत्वं नराः ॥२॥

दृष्ट्वा संभ्रमकारि वस्तुसहसा ऐऐ इति व्याहृतम्
येनाऽकूतवशादपीह वरदे ! बिन्दुं विनाप्यक्षरम् ।
तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्राम्बुजात् ॥३॥

यन्नित्ये ! तव कामराजमपरं मन्त्राक्षरं निष्कलम्
तत्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ।

आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्त्यन्तो द्विजाः
प्रारम्भे प्रणवास्पदप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥४॥
यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैः
तार्तीयीकमहं नमामि मनसा त्वद्बीजमिन्दुप्रभाम् ।
अस्त्वौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गो शब्दो गिरि वर्तते सनियतं योगं विना सिद्धिदः ॥५॥
एकैकं तवदेवि ! बीजमनघं सव्यञ्जनाऽव्यञ्जनं,
कूटस्थं यदि वा पृथक् क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली करोति सहसा तं तं समस्तं नृणाम् ॥६॥
वामे पुस्तक धारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूर कुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तनयन स्निग्ध प्रभा लोकिनीं
ये त्वामऽम्ब न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥७॥

ये त्वां पाण्डुर पुण्डरीक पटलस्पष्टाभिरामप्रभां
सिञ्चन्तीममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
अश्रान्तं विकटस्फुटाक्षर पदा निर्याति वक्त्राम्बुजात्
तेषा भारति ! भारती सुरसरि त्कल्लोललोलोर्मिवत् ॥८॥
ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमाम्
उर्वीं चापि विलीन यावकरस प्रस्तार मग्नामिव ।
पश्यन्ति क्षणमऽप्यऽनन्य मनस स्तेषामऽनङ्गज्वर-
क्लान्तास्त्रस्तकुरङ्ग शावक दृशो वश्या भवन्ति स्फुटम् ॥९॥
चञ्चत्काञ्चनकुण्डलाङ्गद धरामाऽऽबुद्धकाञ्चीस्रजं
ये त्वां चेतसि तद्गतेक्षणमपि ध्यायन्ति कृत्वा स्थितिम् ।
तेषां वेश्मसु विभ्रमादहरहः स्फारी भवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णताललतरलाः स्थैर्यं भजन्ते श्रियः ॥१०॥
आर्भट्या शशिखण्डमण्डितजटाजूटांनृमुण्डस्रजं
बन्धूक प्रसवारूणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामाऽऽपीनतुङ्गस्तनीं

मध्ये निम्नवलित्रयाङ्किततनुं त्वद्रूपसंवित्तये ॥२१॥

जातोऽप्यऽल्प परिच्छदे क्षितिभुजां सामान्य मात्रे कुले
निःशेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरवृन्दवन्दित पदः श्रीवत्सराजोऽभवत्
देवि! त्वच्चरणाम्बुज प्रणतिजः सोऽयंप्रसादोदयः ॥२२॥

चण्डि! त्वच्चरणाम्बुजार्चनविधौ बिल्वीदलोल्लुण्ठन-
त्रुट्यत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः ।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्समत्स्याङ्कितैः
जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥२३॥

विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः
त्वां देवि! त्रिपुरे! पराऽपरमयीं सन्तर्प्य पूजाविधौ ।
यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥२४॥

शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासव प्रभृतयोऽप्याविर्भवन्ति स्फुटम् ।

लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥१५॥

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः ।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥१६॥

लक्ष्मीं राजकुले जयां रणभुवि क्षेमङ्करीमध्वनि
क्रव्याद्द्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजम्बुकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥१७॥

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवि शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥१८॥

आई पल्लवितैः परस्परयुतैर्द्वि त्रिक्रमद्यक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरथो क्षान्तैश्च तैः सस्वरैः ।
नामानि त्रिपुरे ! भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्य परेभ्यो नमः ॥१९॥

बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसो यत्राद्यवृत्ते स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्तत्पाद संख्याक्षरैः
मन्त्रोद्धारविधिर्विशेषसहितः सत्संप्रदायान्वितः ॥२०॥

सावद्यं निरवद्यमस्तु यदि वा किं वा नया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति नरो यस्यास्ति भक्ति स्त्वयि ।
सञ्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्जायमानं हठात्
त्वद्भक्त्या मुखरी कृतेन रचितं यस्मान्मयापि स्फुटम ॥२१॥

चर्चस्तवः

नमस्त्रिपुरसुन्दर्यै

आनन्दसुन्दरपुरन्दरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥१॥

सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
सम्पत्तिकल्पतरवस्त्रिपुरे ! जयन्ति ।
ऐते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि प्रणामः ॥२॥

देवि ! स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोहमऽत्र
स्तोत्रं तव त्रिपुरतापनपत्नि ! कर्तुम् ॥३॥

मातस्तथापि भवतीं भवतीं भवतीव्रताप-
विच्छित्तये स्तुतिमहार्णवकर्णधारः ।

स्तोतुं भवानि ! स भवच्चरणारबिन्द-
भक्तिग्रहः किमपि मां मुखरी करोति ॥४॥
सूते जगन्ति भवती भवती बिभर्ति
जागर्ति तत्क्षयकृते भवती भवानि ।
मोहं भिनत्ति भवती भवती रूणद्धि
लीलायितं जयति चित्रमिदं भवत्याः ॥५॥
यस्मिन्मनागऽपि नवाम्बुजपत्रगौरि !
गौरि ! प्रसादमुधरां दृशमाऽदधासि ।
तस्मिन्निरन्तरमनङ्शरावकीर्ण -
सीमन्तिनीनयनसन्ततयः पतन्ति ॥६॥
पृथ्वीभुजोऽप्युदयनप्रवरस्य तस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
यच्चक्रवर्तिपदवीप्रणयः स एष
त्वत्पादपङ्कजरजः कणजः प्रसादः ॥७॥

कल्पद्रुमप्रसवकल्पितचित्रपूजा-

मुद्दीपितप्रियतमामदरक्तगीतिम् ।

नित्यं भवानि! भवतीमुपवीणयन्ति

विद्याधराः कनकशैलगुहागृहेषु ॥८॥

लक्ष्मीवशीकरणकर्मणि कामिनीना-

माऽऽकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।

नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो

देवि! त्वदङ्घ्रिजनितो जयति प्रसादः ॥९॥

देवि! त्वदङ्घ्रिनखरत्नभुवो मयूखाः

प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति ।

सेवानतिव्यतिकरे सुरसुन्दरीणां

सीमन्तसीम्नि कुसुमस्तवकायितं यैः ॥१०॥

मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं

मध्ये ललाटममरायुधरश्मिचित्रम् ।

हृच्चक्रचुम्बि हुतभुक्कणिकानुरूपं

ज्योतिर्यदेतदिदमम्ब ! तव स्वरूपम् ॥२१॥

रूपं तव स्फुरितचन्द्रमरीचिगौर-

माऽलोकते शिरसि वागधिदैवतं यः ।

निःसीमसूक्तिरचनामृतनिर्झरस्य

तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥२२॥

सिन्दूरपांसुपटलच्छुरितामिव द्यां

त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ।

यः पश्यति क्षणमपि त्रिपुरे ! विहाय

व्रीडां मृडानि! सुदृशस्तमनुद्रवन्ति ॥२३॥

मातर्मुहूर्तमपि यः स्मरति स्वरूपं

लाक्षारसप्रसरतन्तुनिभं भवत्याः ।

ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः

प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥२४॥

योऽयं चकास्ति गगनार्णवरत्नमिन्दु-

र्योऽयं सुराऽसुरगुरुः पुरषः पुराणः ।

यद्धाममर्धमिदमऽन्धकसूदनस्य
देवि ! त्वमेव तदिति प्रतिपादयन्ति ॥२५॥

इच्छानुरूपमऽनुरूपगुणप्रकर्षं
सङ्कर्षिणि ! त्वमनुसृत्य यदा बिभर्षि ।
जायेत स त्रिभुवनैक गुरुस्तदानीं
देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥२६॥

रुद्राणि ! विद्रुममयीं प्रतिमामिव त्वां
ये चिन्तयन्त्यरुणकान्तिमऽनन्यरूपाम् ।
तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते
कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥२७॥

त्वद्रूपमुल्लसितदाडिमपुष्परक्त -
मुद्भावयेन्मदनदैवतमक्षरं यः ।
तं रूपहीनमपि मन्मथनिर्विशेष-
मालोकयन्त्युरुनितम्बभरास्तरुण्यः ॥२८॥

ध्याताऽसि हैमवति ! येन हिमांशुरश्मि-
मालाऽमलद्युतिरऽकल्मषमानसेन ।
तस्याऽविलम्बमऽनवद्यमऽनल्पकल्प-
मल्पैर्दिनैः सृजसि सुन्दरि ! वाग्विलासम् ॥१९॥
आधारमारुतनिरोधवशेन येषां
सिन्दूररंजितसरोजगुणानुकारि ।
तीव्रं हृदि स्फुरति देवि ! वपुस्त्वदीयं
ध्यायन्ति तानिह समीहितसिद्धसाध्याः ॥२०॥
त्वामैन्दवीमिव कलामनुभालदेश-
मुद्भासिताम्बरतलामऽवलोकयन्तः ।
सद्यो ! भवानि ! सुधियः कवयो भवन्ति
त्वं भावनाहितधियां कुल कामधेनुः ॥२१॥
त्वां व्यापिनीति समना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति

देवि! स्तुवन्ति विजयेति जयेत्युमेति ॥२२॥
ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति
रूपं तवाम्ब! नवयावकपङ्कपिङ्गम् ।
तेषां सदैव कुसमायुधबाणभिन्न
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥२३॥
उतप्तहेमरुचिरे त्रिपुरे! पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगडबन्धनपीडितस्य
त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्तु ॥२४॥
शर्वाणि! सर्वजनवन्दितपादपद्मे!
पद्मच्छदच्छविविडम्बितनेत्रलक्ष्मि! ।
निष्पापमूर्तिजनमानसराजहंसि!
हंसि त्वमापदमऽनेकविधां जनस्य ॥२५॥
त्वत्पादपङ्कजरजः प्रणिपातपूतैः
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ।

क्षीरक्षपाकरदुकूलहिमावदाता
कैरप्यवापि भुवनत्रितयेऽपि कीर्तिः ॥२६।

त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तिनं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मे देवि! मा शाम्यतु ॥२७॥

उद्दामकामपरमार्थसरोजषण्ड-
चण्डद्युतिद्युतिमुपासितषट्प्रकाराम् ।
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-
लीलागुहां भगवतीं त्रिपुरां नमामि ॥२८॥

गणेशवटुकस्तुता रतिसहायकामान्विता
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता ।
अनङ्गकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥२९॥

यः स्तोत्रमेतदनुवासरमीश्वरायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो हरिणेक्षणानाम् ॥३०॥

ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ।
वागीश्वरि ! त्रिभुवनेश्वरि ! विश्वमात-
रन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥३१॥

घटस्तवः

ॐ नमस्त्रिपुरसुन्दर्यै

देवि! त्र्यम्बकपत्नि! पार्वति! सति! त्रैलोक्यमातः! शिवे!
शर्वाणि! त्रिपुरे! मृडानि! वरदे रुद्राणि! कात्यायिनि! ।
भीमे! भैरवि! चण्डि! शर्वरि! कले! कालक्षये शूलिनि!
त्वत्पादप्रणतानऽनन्यमनसः पर्याकुलान्पाहि नः ॥१॥

उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्च्छा इव
प्राप्तप्रौढमदा इवार्ति विरहग्रस्ता इवार्ता इव ।
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एकाग्रत-
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति वामभ्रुवः ॥२॥

देवि! त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्मस्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटाः ।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥३॥

ध्यायन्ति ये क्षणमपि त्रिपुरे! हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः

ते विस्फुरन्ति ललितायतलोचनानां

चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥४॥

एतं किं न दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः

किं वामुं निगलाम्यनेन सहसा किं वैकतामाश्रये ।

तस्येत्थं विवशो विकल्पघटनाकुतेन योषिज्जनः

किं तद्यन्न करोति देवि! हृदये यस्य त्वमावर्तसे ॥५॥

विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः

शब्दः शक्तिरिति त्रिलोकजननि! त्वय्येव तथ्यस्थितिः ।

इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं

त्वद्भक्तानऽपि न क्षिणोषि च रुषा तद्देवि! चित्रं महत् ॥६॥

इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं

पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ।

वर्षन्तीममृतं भवानि! भवतीं ध्यायन्ति ये देहिन-

स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥७॥

पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव
क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहितार्तितापविपदस्ते सम्पदं बिभ्रति ॥८॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं
त्वां ग्रन्थिपञ्चकमिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद्दधति चेतसि तान्मृगाक्ष्यः ॥९॥

लाक्षारसस्नपितपङ्कजतन्तुतन्वी-
मऽन्तः स्मरत्यऽनुदिनं भवतीं भवानि ।
यस्तं स्मरप्रतिमम ऽ प्रतिमस्वरूपा
नेत्रोत्पलैर्मृगदृशो भृशमऽर्चयन्ति ॥१०॥

स्तुमस्त्वां वाचमऽव्यक्तां
हिमकुन्देन्दुरोचिषम ।
कदम्बमालां बिभ्राणा-

माऽऽपादतललम्बिनीम् ॥२१॥

मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं
वर्षन्तीमऽमृतं सरोरूहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
अच्छिन्ना च मनोहरा च ललिता चाऽतिप्रसन्नाऽपि च
त्वामेव स्मरतां स्मरारिदयिते! वाक् सर्वतो वल्गति ॥२२॥

ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन्व्याधीञ्छमयति सुखानि प्रतनुते ।
हठादऽन्तर्दुःखं दलयति पिन्ष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्यं न कुरूते ॥२३॥

यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय-
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यश्च त्र्यम्बकवल्लभे! तव गुणानाऽकर्णयत्यादरा -
त्तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥२४॥

किं किं दुःखं दनुजदलिनि! क्षीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि! ख्याप्यते न स्तुतायाम् ।

का का सिद्धिः सुरवरनुते! प्राप्यते नार्चितायां
कं कं योगं त्वयि न चिनुते चित्तमालम्बितायाम् ॥२५॥

ये देवि! दुर्धरकृतान्तमुखान्तरस्था
ये कालि! कालघनपाशनितान्त बद्धाः ।
ये चण्डि! चण्डगुरूकल्मषसिन्धुमग्ना-
स्तान्पासि मोचयसि तारयसि स्मृतैव ॥२६।

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पंति दैवलिखितानि दुरक्षराणि ॥२७॥

रे मूढाः किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः ।
भक्तिश्चेदऽविनाशिनी भगवतीपादद्वयी सेव्यता-
मुन्निद्राम्बुरूहातपत्रसुभगा लक्ष्मीः परो धावति ॥२८॥

याचे न कंचन न कंचन वञ्चयामि
सेवे न कंचन निरस्तसमस्तदैन्यः ।
श्लक्ष्णं वसे मधुरमद्मि भजे वरस्त्री-
देवी हृदि स्फुरति मे कुलकामधेनुः ॥१९॥
शब्दब्रह्ममयि! स्वच्छे देवि त्रिपुरसुन्दरि! ।
यथाशक्ति जपं पूजां गृहाण परमेश्वरि ॥२०॥
नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥२१॥
दर्शनात्पापशमनी जपान्मृत्युविनाशिनी ।
पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ॥२२।
नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥२३॥
मन्त्रहीनंक्रियाहीनं विधिहीनं च यद्गतम् ।
त्वया तत्क्षम्यतां देवि! कृपया परमेश्वरि ॥२४॥

नमस्त्रिपुरसुन्दर्यै

यामाऽऽमनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।
तामऽर्धपल्लवितशङ्कररूपमुद्रां
देवीमऽनन्यशरणः शरणं प्रपद्ये ॥१॥

अम्ब ! स्तवेषु तव तावदऽकर्तृकाणि
कुण्ठीभवन्ति वचसामऽपि गुम्फनानि ।
डिम्बस्य मे स्तुतिरसावऽसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोति ॥२॥

व्योमेति बिन्दुरिति नाद इतीन्दुलेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निःष्यन्दमानसुखबोधसुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम ॥३॥

आविर्भवत्पुलकसन्ततिभिः शरीरै-
र्निःष्यन्दमानसलिलैर्नयनैश्च नित्यम् ।

वाग्भिश्च गद्गदपदाभिरूपास्ते ये
पादौ तवाम्ब! हृदयेषु त एव धन्या ॥४॥
वक्त्रं यदुद्यतमऽभिष्टुतये भवत्या-
स्तुभ्यं नमो यदपि देवि! शिरः करोति ।
चतश्च यत्त्वयि परायणमम्ब ! तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥५॥
मूलालवालकुहरादुदिता भवानि!
निर्भिद्य षट्सरसिजानि तडिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निःष्यन्दमानपरमामृततोयरूपा ॥६॥
दग्धं यदा मदनमेकमऽनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयांचकार ।
धत्ते तदाप्रभृति देवि! ललाटनेत्रं
सत्यं ह्रियेव मुकलीकृतमिन्दमौलिः ॥७॥

अज्ञातसम्भवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये ॥८॥

चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।
वेतालसंहतिपरिग्रहता च शम्भोः
शोभां बिभर्ति गिरिजे! तव साहचर्यात् ॥९॥

कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥१०॥

जन्तोरपश्चिमतनोः सति कर्मसाम्य
निःशेषपाशपटलच्छिदुरा निमेषात् ।

कल्याणि ! दैशिककटाक्षसमाश्रयेण
कारुण्यतो भवसि शाम्भववेददीक्षा ॥११॥
मुक्ताविभूषणवती नवविद्रुमाभा
येच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
ऐकः स एव भुवनत्रयसुन्दरीणां
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥१२॥
ये भावयन्त्यमृवाहिभिरंशुजालै-
राप्यायमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरऽलङ्घनीयां
ब्रह्मादिभिः सुरवरैरपि कालकक्ष्याम् ॥१३॥
यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
माताः स विश्वकवितार्किकचक्रवर्ती ॥१४॥

बर्हावतंस युतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥२५॥
अर्धेन किं नवलताललितेन मुग्धे !
क्रीतं विभोः परूषमर्धमिदं त्वयेति ।
आलीजनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि! जडी भवन्ति ॥२६॥
ब्रह्माण्ड बुद्बुदकदम्बसंकुलोऽयं
मायोदधिर्विविधदुःख तरंगमालः ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसन्ततिमहावडवामुखाग्नौ ॥२७॥
दाक्षायणीति कुटिलेति गुहारणीति
कात्यायनीति कमलेति कलावतीति ।

एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ॥१८॥

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥१९॥

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निःसारमेव निखिलं त्वदृते यदि स्यात् ॥२०॥

ज्योतींषि यद्दिवि चरन्तिरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब ! तव केवलमाज्ञयैव ॥२१॥

सङ्कोचमिच्छसि यदा गिरजे ! तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरीभवन्ति ॥२२॥

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रू किङ्करीकृतसरोजगृहासहस्राः ।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥२३॥

हन्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम ।
वैकर्तनीकिरणसंहतिरेव शक्ता
घर्मं निजं शमयितुं निजयैव वृष्टया ॥२४॥

शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।

ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौले: ॥२५॥
भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीतशान्ति: ।
व्योम्नीति या: किलकला: कलयन्ति विश्वं
तासां विदूरतरमम्ब! पदं त्वदीयम् ॥२६॥
यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।
तावद्विकल्प जटिला: कुटिलप्रकारा-
स्तर्कग्रहा: समयिनां प्रलयं न यान्ति ॥२७॥
यद्देवयानपितृयानविहारमेके
कृत्वा मन: करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥२८॥

स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सासि स्तुता किल मयेति तितिक्षतव्यम् ॥२९॥

कालाग्निकोटिरुचिमम्ब षडध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥३०॥

विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनाम
साक्षादपारकरुणां गुरुमूर्तिमेव ॥३१॥

कुवलयदलनीलं बर्बरस्निग्धकेशं पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥३२॥

सकलजननीस्तवः

ॐ नमः सकलजनन्यै

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः ।
जगन्मातर्जन्मज्वरभयतमःकौमुदि ! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥१॥

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतितुलितनीलोत्पलरूचे ।
शिवस्याराध्याय स्तनभरविनम्राय सततं
नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥२॥

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका-
मुदञ्चद्धर्माम्भः कणगुणितनीलोत्पलरूचम् ।
शिवं पार्थत्राणप्रवणमृगयाकारगुणितं
शिवामन्वग्यान्तीं शवरमहमन्वेमि शवरीम् ॥३॥

मिथः केशाकेशिप्रधननिधनास्तर्कघटना
बहुश्रद्धाभक्तिप्रणयविषयाश्चाप्तविधयः ।
प्रसीद प्रत्यक्षीभव गिरिसुते! देहि शरणं
निरालम्बं चेतः परिलुठति पारिप्लवमिदं ॥४॥

शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं
कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।
अमुष्मिन्विश्वासं विजहिहि ममाह्वाय वपुषि
प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥५॥

अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी
शिवस्यासीर्यत्त्वं परिणयविधौ देवि गृहिणी ।
सवित्री भूतानामपि यदुदमूः शैलतनया
तदेतत्सांसारप्रणयनमहानाटकसुखम् ॥६॥

ब्रुवन्त्येके तत्त्वं भगवति! सदन्ये विदुरस-
त्परे मातः! प्राहुस्तव सदसदन्ये सुकवयः ।

परे नैतत्सर्वं समभिदधते देवि! सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥७॥
तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टात्रिंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥८॥
चतुष्पत्रान्तः षड्दलभगपुटान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियुताभाद्युतियुते ।
षडश्रं भित्त्वादौ दशदलमथ द्वादशदलं
कलाश्रं च द्व्यश्रं गतवति! नमस्ते गिरिसुते ॥९॥
कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधा
परे तत्सम्भेदं समभिदधते कौलमपरे ।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये! तत्त्वं तव कथममी निश्चिनुमहे ॥१०॥

षडध्वारण्यानीं प्रलयरविकोटिप्रतिरूचा
रूचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ।
वितन्वानः शैवं किमपि वपुरिन्दरीवररूचिः
कुचाभ्यामानम्रः शिवपुरूषकारो विजयते ॥११॥
प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुः शिवमकुलमम्ब ! प्रविशति ॥१२॥
प्रियङ्गुश्यामाङ्गीमरूणतरवासः किसलयां
समुन्मीलन्मुक्ताफलबहुलनेपथ्यकुसुमाम् ।
स्तनद्वन्द्वस्फारस्तवकनमितां कल्पलतिका
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥१३॥
षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
श्चलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः ।
क्रमस्त्रोतोतोभिस्त्वं बहसि परनादामृतनदीं
भवानि! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥१४॥

महीपाथोवह्निश्वसनवियदात्मेन्दु रविभि-
र्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब ! महिमा ।
अमून्यालोक्यन्ते भगवति ! न कुत्राप्यणुतरा-
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥२५॥

मनुष्यास्तिर्यञ्चो मरूत इति लोकत्रयमिदं
भवाम्भोधौमग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेदत्र क्वचनतव मातः ! करूणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥२६॥

कलां प्रज्ञामाद्यां समयमनुभूतिं समरसां
गुरू पारम्पर्यं विनयमुपदेशं शिवकथाम् ।
प्रमाणं निर्वाणं परममतिभूतिं परगुहां
विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥२७॥

प्रलीने शब्दौघे तदनु विरते बिन्दुबिम्बे
ततस्तत्त्वे चाष्टध्वनिभिरनुपाधिन्युपरते ।

श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्र गहनां
स्वसंवित्ति योगी रसयति विशाख्यां परतनुम् ॥१८॥
परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निरकारज्ञान प्रकृतिमनवच्छिन्नकरुणाम् ।
सवित्रीं भूतानां निरतिशवधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥१९॥
जगत्कार्ये कत्वा तमपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तमपि परनादाख्यगहने ।
तदेतज्ज्ञानाख्ये तदपि परमानन्दविभवे
महाव्योमाकारे ! त्वदनुशीलो विजयते ॥२०॥
विधे विधे वेधे विविधसमये वेदजननि
विचित्रे ! विश्वाद्ये ! विनयसुलभे वेदगुलके ।
शिवाज्ञे शीलस्थे ! शिवपदवदान्ये ! शिवनिधे !
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरूपमाम् ॥२१॥

विधेर्मुण्डं हृत्वा यदकुरूत पात्रं करतले
हरिं शूलप्रोतं यदऽगमयदंसाभरणताम् ।
अलंचक्रे कण्ठं यदपि गरलेनाम्ब! गिरिशः
शिवस्थायाः शिक्तेस्तदिदमखिलं ते विलसितम् ॥२२॥

विरिञ्च्याख्या मातः! सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रूद्राख्या हरसि विदधासीश्वरदशाम् ।
भवन्ती सादाख्या शिवयसि च पाशोघदलिनी
त्वमेवैकाऽनेका भवसि कृतभेदैर्गिरिसुते ॥२३॥

मुनीनां चेतोभिः प्रमृदितकषायैरपि मनाग्
अशक्ये संस्प्रष्टुं चकितचकितैरम्ब! सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति! पदम् ॥२४॥

तडिद्वल्लीं नित्याममृत सरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यामविनतकुचां विश्वजननी-
मपर्यन्तां लक्ष्मीमभिदधाति सन्तो भगवतीम् ॥२५॥

शरीरं क्षित्यम्भः प्रभ्रतिरचितं केवलमिदं
सुखं दुःखं चायं कलयति पुमांश्चेतन इति ।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहंकारं तव समयबाह्यो गिरिसुते! ॥२६॥

पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने! मार्तभव करूणया सन्निधिकरी ॥२७॥

सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य तनया ।
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती
विवाहाज्जायासीन्यहह चरितं वेत्ति तव कः ॥२८॥

कणस्त्वद्दीप्तीनां रविशशिकृशानुप्रभ्रतयः
परं ब्रह्म क्षुद्रं तव नियतमाऽनन्दकणिका ।

शिवादिक्षित्यन्तं त्रिवलयतनोः सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥२६॥
त्वया यो जानीते रचयसि भवत्यैव सततं
त्वयैवेच्छत्यम्ब! त्वमसि निखिला यस्य तनवः ।
गतः साम्यं शम्भुर्वहति परमं व्योम भवती
तथाप्यवं हित्वा विहरति शिवस्येति किमिदम् ॥३०॥
पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूल सूक्ष्मं सकुलमकुलंगुह्यमगुह्म ।
दवीयो नेदीयः सदसदिति विश्वं भगवतीं
सदा पश्यन्त्याज्ञां वहसि भुवनक्षोभजननीम् ॥३१॥
मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलप्रतिहतमहिम्नीव पृषतः ।
उदेत्योदेत्याम्ब! त्वयि सह निजैस्तात्त्विककुलै-
र्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशा ॥३२॥

विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ।
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां
विकल्पैरेभिस्त्वामऽभिदधति सन्तो भगवतीम् ॥३३॥

प्रविश्य स्वं मार्गं सहजदयया देशिकदृशा
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ।
परानन्दाकारां सपदि शिवयन्तीमपि तनुं
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥३४॥

शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥३५॥

असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-
द्दृते जन्मन्यन्त्ये गुरुवपुषमासाद्य गिरिशम्

अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवान्
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ॥३६॥
नयेयं

यत्षट्पत्रं कमलमुदितं
तस्य या कर्णिकाख्या
योनिस्तस्या प्रथितमुदरे
यत्तदोङ्कारपीठम् ।

तस्मिन्नऽनतः कुचभरनतां
कुण्डलीतः प्रवृत्तां
श्यामाकारां सकलजननीं
सन्ततं भावयामि ॥३७॥

भुवि पयसि कृशानौ
मारुते खे शशांके
सवितरि यजमाने-
ऽप्यष्टधा शक्तिरेका ।

बहति कुचभराभ्यां
या विनम्रापि विश्वं
सकलजननि! स त्वं
पाहिमामित्यवश्यम् ॥३८॥



ॐ नमो भवान्यै

ॐ शङ्खत्रिशूलशरचापकरां त्रिनेत्रां
तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितामसुरसिद्धनुतां च दुर्गां
दूर्वानिभां दुरितदुःखहरां नमामि ॥१॥

अकुलकुलपतन्ती चक्रमध्ये स्फुरन्ती
मधुरमधुपिबन्ती कण्टकान्भक्षयन्ती ।
दुरितमपहरन्ती साधकान्पोषयन्ती
जयति जगति देवी सुन्दरी क्रीडयन्ती ॥२॥

चतुर्भुजामेकवक्त्रां पूर्णेन्दुवदनप्रभाम ।
खड्गशक्तिधरां देवीं वरदाभयपाणिकाम् ॥३॥

प्रेतसंस्थां महारौद्रीं भुजगेनोपवीतिनीम् ।
भवानीं कालसंहारबद्धमुद्राविभूषिताम् ॥४॥

जगत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः सुरैः ।
स्तुतां तां परमेशानीं नौम्यहं विघ्नहारिणीम् ॥५॥

ॐ नमो भवान्यै ॥

कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतमासीनं प्रसन्नमुखपङ्कजम् ॥६॥
सुरासुरशिरोरत्नरञ्जिताङ्घ्रियुगं प्रभुम्
प्रणम्य शिरसा नन्दी बद्धाञ्जलिरभाषत ॥७॥

श्रीनन्दिकेश्वर उवाच ॥

देवदेव जगन्नाथ संशयोऽस्ति महान्मम ।
रहस्यमेकमिच्छामि प्रष्टुं त्वां भक्तवत्सलम् ॥८॥
देवतायास्त्वया कस्या स्तोत्रमेतद्दिवानिशम् ।
पठ्यतेऽविरतं नाथ ! त्वत्तः किमपरं परम् ॥९॥
इति पृष्टस्तदा देवो नन्दिकेन जगद्गुरू ।
प्रवाचो भगवानेको विकसन्नेत्रपङ्कजः ॥१०॥

श्रीभगवानुवाच ॥

साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत् ।
स्कन्दस्यापि च यद्गोप्यं रहस्यं कथयामि तत् ॥११॥

पुरा कल्पक्षये लोकान्सिसृक्षुर्मूढ चेतसा ।
गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता ॥२२॥
तस्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभि: ।
चेतनेति तत: शक्तिर्मां काप्यालिङ्ग्य तस्थुषी ॥२३॥
हेतुः संकल्पजालस्य मनोधिष्ठायिनी शुभा ।
इच्छेति परमा शक्तिरून्मिमील तत: परम् ॥२४॥
ततो वागिति विख्याता शक्ति: शब्दमयी परा ।
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ॥२५॥
ब्रह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा ।
सिद्धिदा बुद्धिदा शान्ता सर्वमङ्गलदायिनी ॥२६॥
तयैतत्सृज्यते विश्वमनाधारं च धार्यते ।
तयैतत्पाल्यते सर्वं तस्यामेव प्रलीयते ॥२७॥
अर्चिता प्रणता ध्याता सर्वभावविनिश्चिता ।
आराधिता स्तुता सैव सर्वसिद्धिप्रदायिनी ॥२८॥

तस्या अनुग्रहादेव तामेव स्तुतवानहम् ।
सहस्रैर्नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः ॥१९॥
स्तवेनानेन सन्तुष्टा मामेव प्रविवेश सा ।
तदारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमम् ॥२०॥
तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् ।
ससुरासुरगन्धर्वयक्षराक्षसमानवम् ॥२१॥
सपन्नगं साब्धिकं सशैलवनकाननम् ।
सराशिग्रहनक्षत्रं पंचभूतगुणान्वितम् ॥२२॥
नन्दिन्नामसहस्रेण स्तवेनानेन सर्वदा ।
स्तवे परापरां शक्तिं ममानुग्रहकारिणीम् ॥२३॥
इत्युक्तोपरतं देवं चराचरगुरूं विभुम ।
प्रणम्य शिरसा नन्दी प्रोवाच परमेश्वरम् ॥२४॥

श्रीनन्दिकेश्वर उवाच ॥

भगवन्देवदेवेश लोकनाथ जगत्पते ।
भक्तोऽस्मि तव दासोऽस्मि प्रसादः क्रियतां मयि ॥२५॥

देव्याः स्तवमिमं पुण्यं दुर्लभं यत्सुरैरपि ।

श्रोतुमिच्छाम्यहं देव प्रभावमपि चास्य तु ॥२६॥

श्रीभगवानुवाच ॥

श्रृण नन्दिन्महाभाग स्तवराजमिमं शुभम् ।

सहस्रैर्नामभिर्दिव्यैः सिद्धिदं सुखमोक्षदम् ॥२७॥

शुचिभिः प्रातरूत्थाय पठितव्यं समाहितैः ।

त्रिकालं श्रद्धया युक्तैर्नातः परतरः स्तवः ॥२८॥

अस्य श्रीभवानीनामसहस्रस्तवराजस्य, महादेवऋषिः, अनुष्टुप्छन्दः, आद्या शक्तिः, भगवती भवानी देवता, ह्रीं बीजं, श्रीं शक्तिः, क्लीं कीलकं आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थे, अमुककामना सिद्ध्यर्थे पाठे विनियोगः ॥

अथ करन्यासः

ॐ एकवीरायै अङ्गुष्ठाभ्यां नमः

ॐ महामायायै तर्जनीभ्यां नमः

ॐ पार्वत्यै मध्यमाभ्यां नमः

ॐ गिरीशप्रियायै अनामिकाभ्यां नमः

ॐ गौर्यै कनिष्ठिकाभ्यां नमः

ॐ करालिन्यै करतलकरपृष्ठाभ्यां नमः ॥

अथ षडङ्गन्यासः ॥

ॐ एकवीरायै हृदयाय नमः

ॐ महामायै शिरसे स्वाहा

ॐ पार्वत्यै शिखायै वषट्

ॐ गिरीशप्रियायै कवचायहुम्

ॐ गौर्यै नेत्राभ्यां वौषट्

ॐ करालिन्यै अस्त्रायफट् ॥

प्राणायामः

ध्यानम्

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुशशरांश्चापं धारयन्तीं शिवां भजे ॥

अर्धेन्दुमौलिममलाममराभिवन्द्याम-

म्भोजपाशसृणरक्तकपालहस्ताम् ।

रक्ताङ्गरागरागरशनाभरणं त्रिनेत्रां

ध्याये शिवस्य वनितां मधुविह्वलाङ्गीम् ॥

बीजत्रयायै विद्महे, तत्प्रधानायै धीमहि, तन्नः शक्तिः प्रचोदयात ॥(३)॥

मूलम्

ॐ श्रीं श्रीं ॐॐ ह्रीं श्रीं श्रीं भवानि हुं फट स्वाहा ॥(१०८)॥

श्री शङ्ख चक्र मुसलाम्बुजयुग्महस्तां नागेन्द्रहारवलयाङ्कितकण्ठ मालाम । सिन्दूर कङ्कुम सहस्रमरीचिदीप्तां श्रीशारिकां त्रिनयनां हृदये स्मरामि ॥ याद्वादशार्क परिमण्डित मूर्तिरेका सिंहासनस्थितिमतीमुरगै-वृतां च । देवीमनक्षगतिमीश्वरितां प्रपन्ना तां नौमि भार्गवपुषों परमार्थ राज्ञीम ॥ ज्वालापर्वत संस्थितामत्रिनयनां पीठत्रयाधिष्ठिता ज्वालाडम्बर भूषितां सुवदना नित्यामदृश्यां जनैः । षटचक्राम्बुजमद्ययगां वरगदाम्भोजा-भयान्बीं भ्रतीं चिद्रूपां सकलार्थ दीपनकरीं ज्वाला मुखीनौम्यहम् ॥ गणेशवटुकस्तुता रतिसहाय कामान्विता स्मरारिवरविष्टरा कुसुमबाणबाणै-र्युता । अनङ्ग कुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः कदम्बवनमध्यगा त्रिपुरसुन्दरी पातुनः ॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी
तृतीयं चन्द्र घण्टेति कुष्माण्डेति चतुर्थकम ॥
पञ्चमं स्कन्दमातेति षष्टं कात्यायनीति च
सप्तमं कालरात्रीति महागौरीति चाष्टमम ॥
नवमं सिद्धि दात्री च नवदुर्गा प्रकीर्तिता ।

बीजत्रयाय विद्महे तत्प्रधानाय धीमहि, तन्नः शक्ति प्रचोदयात ॥ (३)
मूलम । ऊँ श्रीं श्रीं ऊँ ऊँ ह्रीं श्रीं श्रीं भवानि हुं फट स्वाहा

ऊँ सुभगायै विद्महे कामालिन्यै धीमहि । तन्नो दुर्गा प्रचोदयात ॥ (३)

श्री इश्वर उवाच

ॐ महाविद्या जगन्माता महालक्ष्मीः शिवप्रिया ।
विष्णुमाया शुभा शान्ता सिद्धा सिद्धसरस्वती ॥१॥
क्षमा कान्तिः प्रभा ज्योत्सना पार्वती सर्वमङ्गला ।
हिङ्गुला चण्डिका दान्ता पद्मा लक्ष्मीर्हरिप्रिया ॥२॥
त्रिपुरा नन्दिनी नन्दा सुनन्दा सुरवन्दिता ।
यज्ञविद्या महामाया वेदमाता सुधा धृतिः ॥३॥
प्रीतिर्प्रथा प्रसिद्धा च मृडानी विन्ध्यवासिनी ।
सिद्धविद्या महाशक्तिः पृथ्वी नारदसेविता ॥४॥
पुरुहूतप्रिया कान्ता कामिनी पद्मलोचना ।
प्रह्लादिनी महामाता दुर्गा दुर्गतिनाशिनी ॥५॥
ज्वालामुखी सुगोत्रा च ज्योतिः कुमुदहासिनी ।
दुर्गमा दुर्लभा विद्या स्वर्गतिः पुरवासिनी ॥६॥
अपर्णा शाम्बरीमाया मदिरा मृदुहासिनी ।
कुलवागीश्वरी नित्या नित्यक्लिन्ना कृशोदरी ॥७॥
कामेश्वरी च नीला च भीरुण्डा वह्निवासिनी ।

लम्बोदरी महाकाली विद्याविद्येश्वरी तथा ॥८॥
नरेश्वरी च सत्या च सर्वसौभाग्यवर्धिनी ।
संकर्षणी नारसिंही वैष्णवी च महोदरी ॥९॥
कात्यायनी च चम्पा च सर्वसम्पत्तिकारिणी ।
नारायणी महानिद्रा योगनिद्रा प्रभावती ॥१०॥
प्रज्ञापारमिता प्रज्ञा तारा मधुमती मधुः
क्षीरार्णवसुधाहारा कालिका सिंहवाहिनी ॥११॥
ओंकारा वसुधाकारा चेतना कोपनाकृतिः
अर्धबिन्दुधरा धारा विश्वमाता कलावती ॥१२॥
पद्मावती सुवस्त्रा च प्रबुद्धा च सरस्वती ।
कुण्डासना जगद्धात्री बुद्धमाता जिनेश्वरी ॥१३॥
जिनमाता जिनेन्द्रा च शारदा हंसवाहना ।

राज्यलक्ष्मीर्वषट्कारा सुधाकारा सुधात्मिका ॥१४॥
राजनीतिस्त्रयी वार्ता दण्डनीतिः क्रियावती ।
सद्भूतिस्तारिणी श्रद्धा सद्गतिः सत्परायणा ॥१५॥

सिन्धुर्मन्दाकिनी गंगा यमुना च सरस्वती ।
गोदावरी विपाशा च कावेरी च शतद्रुका ॥२६॥
सरयुश्चन्द्रभागा च कौशिकी गण्डकी शुचि ।
नर्मदा कर्मनाशा च चर्मण्वत्यथदेविका ॥२७॥
वेत्रवती वितस्ता च वरदा नरवाहना ।
सती पतिव्रता साध्वी सुचक्षुः कुण्डवासिनी ॥२८॥
एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालिनी ।
सेना श्रोणिः पताका च सुव्यूहा युद्धकांक्षिणी ॥२९॥
पताकिनी दयारम्भा विपञ्चीपञ्चमप्रिया ।
परापरकलाकान्ता त्रिशक्तिर्मोक्षदायिनी ॥३०॥
ऐन्द्री माहेश्वरी ब्राह्मी कौमारी कुलवासिनी ।
इच्छा भगवती शक्तिः कामधेनुः कृपावती ॥३१॥
वज्रायुधा वज्रहस्ता चण्डी चण्डपराक्रमा ।
गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी ॥३२॥
एकानेका महेज्या च शतबाहुर्महाभुजा ।

भुजङ्गभूषणा भुषा षटचक्रक्रमवासिनी ॥२३॥

षटचक्रभेदिनी श्यामा कायस्था कायवर्जिता

सुस्मिता सुमुखीक्षामा मूलप्रकृतिरीश्वरी ॥२४॥

अजा च बहुवर्णा च पुरूषार्थप्रवर्तिनी

रक्ता नीला सिता श्यामा कृष्णा पीता च कर्बुरा ॥२५॥

क्षुधा तृष्णा जरावृद्धा तरूणी करूणालया ।

काला काष्टा मुहूर्ता च निमेषा कालरूपिनी ॥२६॥

सुकर्णरसना नासा चक्षु: स्पर्शवती रसा ।

गन्धप्रिया सुगन्धा च सुस्पर्शा च मनोगति: ॥२७॥

मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी ।

पद्मयोनि: सुकेशी च सुलिङ्गा भगरूपिणी ॥२८॥

योनिमुद्रा महामुद्रा खेचरी खगगामिनी ।

मधुश्रीर्माधवीवल्ली मधुमत्ता मदोद्धता ॥२९॥

मातङ्गी शुकहस्ता च पुष्पवाणेक्षचापिनी ।

रक्ताम्बरधरा क्षीबा रक्तपुष्पावतंसिनी ॥३०॥

शुभ्राम्बरधरा धीरा महाश्वेता वसुप्रिया ।
सुवेणिः पद्महस्ता च मुक्ताहारविभूषणा ॥३१॥
कर्पूरामोदनिःश्वासा पद्मिनी पद्ममन्दिरा ।
खड्गिनी चक्रहस्ता च भुसुण्डी परिघायुधा ॥३२॥
चापिनी पाशहस्ता च त्रिशूलवरधारिणी ।
सुबाना शक्तिहस्ता च मयूरवरवाहना ॥३३॥
वरायुधधरा वीरा वीरपानमदोत्कटा ।
वसुधा वसुधारा च जया शाकम्भरी शिवा ॥३४॥
विजया च जयन्ती च सुस्तनी शत्रुनाशिनी ।
अन्तर्वत्नी वेदशक्तिर्वरदा वरधारिणी ॥३५॥
शीतला च सुशीला च बालग्रहविनाशिनी
कुमारी च सुपर्वा च कामाख्या कामवन्दिता ॥३६॥
जालन्धरधराऽनन्ता कामरूपनिवासिनी ।
कामबीजवती सत्या सत्यधर्मपरायणा ॥३७॥
स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिप्रबोधिनी ।

षट्कोणा च त्रिकोणा च त्रिनेत्रा त्रिपुरसुन्दरी ॥३८॥
वृषप्रिया वृषारूढा महिषासुरघातिनी ।
शुम्भदर्पहरा दीप्ता दीप्तपावकसन्निभा ॥३९॥
कपालभूषणा काली कपालमालधारिणी ।
कपालकुण्डला दीर्घा शिवादूती घनध्वनिः ॥४०॥
सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी ।
कम्बुग्रीवा वसुमती छत्रच्छायाकृतालया ॥४१॥
जगद्गर्भा कुण्डलिनी भुजगकारशायिनी ।
प्रोल्लसत्सप्तपद्मा च नाभिनालमृणालिनी ॥४२॥
मूलाधारा निराकारा वह्निकुण्डकृतालया ।
वायुकुण्डसुखासीना निराधारा निराश्रया ॥४३॥
श्वासोच्छ्वासगतिर्जीवा ग्राहिनी वह्निसंश्रया ।
वह्नितन्तुसमुत्थाना षड्रसास्वादलोलुपा ॥४४॥
तपस्विनी तपःसिद्धि तापसी च तपःप्रिया ।
तपोनिष्ठा तपोयुक्ता तपसः सिद्धिदायिनी ॥४५॥

सप्तधातुमयीमूर्तिः सप्तधात्वन्तराश्रया ।
देहपुष्टिर्मनस्तुष्टिरन्नपुष्टिर्बलोद्धता ॥४६
ओषधिर्वैद्यमाता च द्रव्यशक्ति प्रभाविनी ।
वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी ॥४७॥
मृगया मृगमांसादा मृगत्वङ्‌मृगलोचना ।
वागुरा बन्धरूपा च वधरूपा वधोद्धता ॥४८॥
बन्दी बन्दिस्तुताकारा कारबन्धविमोचनी ।
शृङ्खला खलहा विद्युद्दृढबन्धविमोचनी ॥४९॥
अम्बिकाऽम्बालिकाचाम्बा स्वक्षा साधुजनार्चिता ।
कौलिकी कुलविद्या च सुकुला कुलपूजिता ॥५०॥
कालचक्रभ्रमा भ्रान्ता विभ्रमा भ्रमनाशिनी ।
वात्याली मेघमाला च सुवृष्टिः सस्यवर्द्धिनी ॥५१॥
अकारा च इकारा च उकारैकाररूपिणी ।
ह्रींकारी बीजरूपा च क्लींकाराम्बरवासिनी ॥५२॥
सर्वाक्षरमयीशक्तिरक्षरा वर्णमालिनी ।

सिन्दूरारूणवक्त्रा च सिन्दूरतिलकप्रिया ॥५३॥
वश्या च वश्यबीजा च लोकवश्यविभाविनी ।
नृपवश्या नृपैः सेव्या नृपवश्यकरी क्रिया ॥५४॥
महिषी नृपमान्या च नृमान्या नृपनन्दिनी ।
नृपधर्ममयी धन्या धनधान्यविवर्द्धिनी ॥५५॥
चतुर्वर्णमयीमूर्तिश्चतुर्वर्णैश्च पूजिता ।
सर्वधर्ममयीसिद्धिश्चतराश्रमवासिनी ॥५६॥
ब्रह्मणी क्षत्रिया वैश्या शूद्राचावरवर्णजा ।
वेदमार्गरता यज्ञा वेदविश्वविभाविनी ॥५७॥
अस्त्रशस्त्रमयीविद्या वरशस्त्रास्त्रधारिणी ।
सुमेधा सत्यमेधा च भद्रकाल्यऽपराजिता ॥५८॥

गायत्री सत्कृतिः सन्ध्या साविंत्री त्रिपदाश्रया ।
त्रिसन्ध्या त्रिपदी धात्री सुपर्वा सामगायनी ॥५९॥
पाञ्चाली बालिका बाला बालक्रीडा सनातनी ।
गर्भाधारधरा शून्या गर्भाशयनिवासिनी ॥६०॥

सुरारिघातिनीकृत्या पूतना च तिलोत्तमा ।
लज्जा रसवती नन्दा भवानी पापनाशिनी ॥६१॥
पट्टाम्बरधरा गीतिः सुगीतिर्ज्ञानिलोचना
सप्तस्वरमयीतन्त्री षड्जमध्यमधैवता ॥६२॥
मूर्च्छनाग्रामसंस्थाना स्वस्था स्वस्थानवासिनी ।
अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी ॥६३॥
नृत्तगीतप्रियाऽकामा तुष्टिदा पुष्टिदाक्षया ।
निष्ठा सत्यप्रिया प्रज्ञा लोकेशी च सुरोत्तमा ॥६४॥
सविषा ज्वालिनी ज्वाला विषमोहार्तिनाशिनी ।
विषारिर्नागदमनी कुरुकुल्लाऽमृतोद्भवा ॥६५॥
भूतभीतिहरारक्षा भूतावेशविनाशिनी ।
रक्षोघ्नी राक्षसी रात्रिर्दीर्घनिद्रा दिवागतिः ॥६६॥
चन्द्रिका चन्द्रकान्तिश्च सूर्यकान्तिर्निशाचरी ।
डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी ॥६७॥
सितासितप्रिया स्वङ्गा सकला वनदेवता ।

गरूरूपधरा गुर्वी मृत्युर्मारी विशारदा ॥६८॥
महामारी विनिद्रा च तन्द्रा मृत्युविनाशिनी ।
चन्द्रमण्डलसंकाशा चन्द्रमण्डलवासिनी ॥६९॥
अणिमादिगुणोपेता सुस्पृहा कामरूपिणी ।
अष्टसिद्धप्रदा प्रौढा दुष्टदानवघातिनी ॥७०॥
अनादिनिधनापुष्टिश्चतुर्बाहुर्चतुर्मुखी ।
चुतुःसमुद्रशयना चतुर्वर्गफलप्रदा ॥७१॥
काशपुष्पप्रतीकाशा शरत्कुमुदलोचना ।
भूता भव्या भविष्या च शैलजा शैलवसिनी ॥७२।
वाममार्गरता वामा शिववामाङ्गवासिनी ।
वामाचारप्रिया तुष्टा लोपामुद्रा प्रबोधिनी ॥७३॥
भूतात्मा परमात्मा च भूतभाविविभाविनी
मङ्गला च सुशीला च परमार्थप्रबोधिका ॥७४॥
दक्षिणा दक्षिणामूर्तिः सुदक्षिणा हरिप्रिया ।
योगिनी योयुक्ता च योगाङ्गा ध्यानशालिनी ॥७५॥

योगपट्टधरा मुक्ता मुक्तानां परमागतिः ।
नारसिंही सुजन्मा च त्रिवर्गफलदायिनी ॥७६॥
धर्मदा धनदा चैव कामदा मोक्षदा द्युति ।
साक्षिणी क्षणदा दक्षा दक्षजा कोटिरूपिणी ॥७७॥
क्रतुः कात्यायनी स्वच्छा स्वच्छन्दा च कविप्रिया ।
सत्यगामा विहःस्था च काव्यशक्तिः कवित्वदा ॥७८॥
मेनापुत्री सतीमाता मैनाकभगिनी तडित् ।
सौदामिनी स्वधाम च सुधामा धामशालिनी ॥७९॥
सौभाग्यदायिनीद्यौश्च सुभगा द्युतिवर्दिनी ।
श्री कृत्तिवसना चैव कङ्काली कलिनाशिनी ॥८०॥
रक्तबीजवधोद्दृप्ता सुतन्तुर्बीजसन्ततिः ।
जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी ॥८१॥
चामीकररूचिश्चान्द्रीसाक्षयाषोडशीकला ।
यत्तत्पदानुबन्धा च यक्षिणी धनदार्चिता ॥८२॥
चित्रिणी चित्रमाया च विचत्रा भुवनेश्वरी ।

चामुण्डा मुण्डहस्ता च चण्डमुण्डवधोद्धरा ॥८३॥
अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी ।
अमा कलशहस्ता च पूर्णकुम्भधरा धरा ॥८४॥
अभीरूर्भैरवी भीमा भीरा त्रिपुरभैरवी ।
महारूण्डा च रौद्री च महाभैरवपूजिता ॥८५॥
निर्मुण्डा हस्तिनी चण्डा करालदशनानना ।
कराला विकराला च घोरघुर्घुरनादिनी ॥८६॥
रक्तदन्तोर्ध्वकेशी च बन्धूककुसुमारूणा ।
कादम्बरी पटासा च काशमीरी कुंकुमप्रिया ॥८७॥
क्षान्तिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा ।
मातङ्गिनी वरारोहा मतमातङ्गगामिनी ॥८८॥
हिंसा हंसगतिर्हंसी हंसोज्ज्वलशिरोरूहा ।
पूर्णचन्द्रमुखी श्यामा स्मितास्या श्यामकुण्डला ॥८९॥
मषी च लेखिनी लेख्या सुलेखा लेखकप्रिया ।
शङ्खिनी शंखहस्ता च जलस्था जलदेवता ॥९०॥

कुरुक्षेत्रावनिः काशी मथुरा काञ्च्यवन्तिका ।
अयोध्या द्वारका माया तीर्था तीर्थंकरप्रिया ॥६१॥
त्रिपुष्कराऽप्रमेया च कोशस्था कोशवासिनी ।
कौशिकी तु कुशावर्ता कौशाम्बी कोशवर्द्धिनी ॥६२॥
कोशदा पद्मकोशाक्षी कुसुमा कुसुमप्रिया ।
तोतुला च तुलाकोटिः कूटस्था कोटरश्रया ॥६३॥
स्वयम्भूश्च सुरूपा च स्वरूपा रूपवर्द्धिनी ।
तेजस्विनी सुभिक्षा च बलदा बलदायिनी ॥६४॥
महाकोशी महावर्ता बुद्धिः सदसदात्मिका ।
महाग्रहहरा सौम्या विशोका शोकनाशिनी ॥६५॥
सात्त्विकी सत्त्वसंस्था च राजसी च रजोवृता ।
तामसी च तमोयुक्ता गुणत्रयविभाविनी ॥६६॥
अव्यक्ता व्यक्तरूपा च वेदविद्या च शाम्भवी ।
शंकराकल्पिनीकल्पा मनः संकल्पसन्तति ॥६७॥
सर्वलोकमयीशक्तिः सर्वश्रवणगोचरा ।

सर्वज्ञानवतीवाञ्छा सर्वतत्त्वानुबोधिनी ॥९८॥

जाग्रती च सुषुप्तिश्च स्वप्नावस्था तुरीयका

त्वरा मन्दगतिर्मन्दा मदिरामोदधारिणी ॥९९॥

पानभूमिः पानपात्रा पानदानकरोद्यता ।

आघूर्णारुणनेत्रा च किंचिदव्यक्तभाषिणी ॥२००॥

आशपूरा च दिक्षा च दक्षा दीक्षितपूजिता

नागवल्ली नागकन्या भोगिनी भोगवल्लभा ॥२०१॥

सर्वशास्त्रवतीविद्या सुस्मृतिर्धर्मवादिनी ।

श्रुतिः श्रुतिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥२०२॥

मीमांसा तर्कविद्या च सभक्तिर्भक्तवत्सला ।

सुनाभिर्यातना जातिर्गम्भीरा भाववर्जिता ॥२०३॥

25 SUNDAY

नागपाशधरामूर्तिरगाधा नागकुण्डला ।

सुचक्रा चक्रमध्यस्था चक्रकोणनिवासिनी ॥२०४॥

सर्वमन्त्रमयीविद्या सर्वमन्त्राक्षरावलिः ।

मधुस्रवा स्रवन्ती च भ्रामरी भ्रमरालका ॥२०५॥

मातृमण्डलमध्यस्था मातृमण्डलवासिनी ।
कुमारजननी क्रूरा सुमुखी ज्वरनाशिनी ॥१०६॥
अतीता विद्यमाना च भाविनी प्रीतिमञ्जरी ।
सर्वसौख्यवतीयुक्तिराहार परिणामिनी ॥१०७॥
निदानं पञ्चभूतानां भवसागरतारिणी ।
अक्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता ॥१०८॥
रोहिणी भुमिगर्भा च कालभूः कालवर्तिनी ।
कलंकरहितानारी चतुष्षष्ट्यभिधावती ॥१०९॥
जीर्णा च जीर्णवस्त्रा च नूतना नववल्लभा ।
अरजा रतिः प्रीतिर्रतिरागविवर्द्धिनी ॥११०॥
पञ्चवातगतिर्भिन्ना पञ्चश्लेष्माशयाधरा ।
पञ्चपित्तवतीशक्तिः पञ्चस्थानविबोधिनी ॥१११॥
उदकया च वृषस्यन्ती बहिः प्रस्त्रविणीत्र्यहम ।
रजः शुक्रधराशक्तिर्जरायुर्गर्भधारिणी ॥११२॥
त्रिकालज्ञा त्रिलिङ्गा च त्रिमूर्तिः त्रिपुरवासिनी ।

अरागा शिवतत्त्वा च कामतत्त्वानुरागिणी ॥११३॥

प्राच्यवाची प्रतीचीदिक् उदीचीदिक् विदिग्दिशाम् ।

अहंकृतिरहंकारा बलिमाया बलिप्रिया ॥११४॥

स्रुकस्रुवा सामिधेनी च सश्रद्धा श्राद्धदेवता ।

माता मातामही तृप्तिः पितृमाता पितामही ॥११५॥

स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री शिशुप्रिया

स्तन्दा स्तनधारा च विश्वयोनिः स्तनन्धयी ॥११६॥

शिशूत्सङ्गधरा दोला दोलाक्रीडाभिनन्दिनी ।

उर्वशी कदली केका विशिखा शिखिनर्तिनी ॥११७॥

खट्वाङ्गधारिणी खट्वा बाणपुङ्खानुवर्तिनी ।

लक्ष्यप्राप्तिः कलाऽलक्ष्या लक्ष्या च शुभलक्षणा ॥११८॥

वर्तिनी सुपथाचारा परिखा च खनिर्वृतिः ।

प्राकारवलया वेला मर्यादा च महोदधौ ॥११९॥

पोषणीशोषणीशक्तिर्दीर्घकेशी सुलोमशा

ललिता मांसला तन्वी वेदवेदाङ्गधारिणी ॥१२०॥

नरासृक्पानमत्ता च नरमुण्डास्थिभूषणा
अक्षक्रीडारतिः शारी शारिकाशुकभाषिणी ॥२२१॥
शाम्बरी गारुडिविद्या वारुणी वरुणार्चिता ।
वाराही मुण्डहस्ता च दंष्ट्रोद्धृतवसुन्धरा ॥२२२॥
मीनमूर्तिधरा मूर्त्ता वदन्या प्रतिमाश्रया ।
अमूर्ता निधिरूपा च सालिग्रामशिलाशुचिः ॥२२३॥
स्मृतिः संस्काररूपा च सुसंस्कारा च संस्कृतिः ।
प्राकृता देशभाशा च गाथा गीतिः प्रहेलिका ॥२२४॥
इडा च पिङ्गला पिङ्गा सषुम्णा सुर्यवाहिनी ।
शशिस्रवा च तालुस्था काकिन्यमृतजीविनी ॥२२५॥
अणुरूपा वृहद्रूपा लघुरूपा गुरुस्थिरा ।
स्थावरा जङ्गमा देवी कृतकर्मफलप्रदा ॥२२६॥
विषयाक्रान्तदेहा च निर्विशेषा जितेन्द्रिया ।
विश्वरूपा चिदानन्दा परब्रह्मप्रबोधिनी ॥२२७॥
निर्विकारा च निर्वैरा विरतिः सत्यवर्धिनी ।

पुरुषाज्ञा च भिन्ना च क्षान्तिः कैवल्यदायिनी ॥१२८॥
विविक्तसेविनी प्रज्ञाजनयित्री बहुश्रुतिः ।
निरीहा च समस्तैका सर्वलोकैकसेविता ॥१२९॥
सेवा सेवाप्रिया सेव्या सेवाफलविवर्द्धिनी ।
कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी ॥१३०॥
प्रत्यञ्चा च धनुर्यष्टिः खड्गधारा दुरानतिः ।
अश्वप्लुतिश्च वल्गा च सृणिः सन्मत्तवारणा ॥१३१॥
वीरभूर्वीरमाता च वीरसूर्वीरनन्दिनी ।
जयश्रीर्जयदीक्षा च जयदा जयवर्द्धिनी ॥१३२॥
सौभाग्यसुभगाकारा सर्वसौभाग्यवर्द्धिनी ।
क्षेमङ्करी सिद्धिरूपा सत्कीर्तिः पथिदेवता ॥१३३॥
सर्वतीर्थमयीमूर्तिः सर्वदेवमयीप्रभा ।
सर्वसिद्धिप्रदाशक्तिः सर्वमङ्गलमङ्गला ॥१३४॥

सर्वमङ्गल मङ्गल्ये शिवे सर्वार्थ साधिके शरण्ये-
त्र्यम्बके गौरि नारायणि नमोस्तुते ॥ शरणगतदीनार्त
परित्राणपरायणे सर्वस्यार्तिहरे देवि नारायणि नमोस्तुते ॥
सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते भयेभ्यस्त्राहिनो
देवि दुर्गे देवि नमोस्तुते ॥ सर्वाबाधा प्रशमन त्रैलोक्य-
स्याखिलेश्वरि एवमेवत्वयाकार्यमस्मद्वैरिविनाशनम् ॥
महाबले महोत्साहे महाभयविनाशिनि त्राहिमां देवि दुष्प्रेक्ष्ये
शत्रूणां भयवर्द्धिनि ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रया तथा
सुरेन्द्रेण दिनेषु सेविता । करोतु सा नः शुभहेतुरीश्वरी शुभानि
भद्राण्यभिहन्तु चापदः ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तुकामान्
सकलानभीष्टान् । त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता
ह्याश्रयतां प्रयान्ति ॥ प्रणतानां प्रसीदत्वं देवि विश्वार्ति हारिणि
त्रैलोक्य वासिनामीड्ये लोकानां वरदाभव् ॥

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातंगी विजया जया भगवती देवी शिवा शाम्भवी ।
शकितः शंकर- वल्लभा त्रिनयना वाक्-वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारी- त्यसि ॥

अनेन मन्त्रपाठेन आत्मनो वांगमनः कायोपार्जित- पाप-
निवारणार्थ श्री इष्ट-देवी-प्रीत्यर्थं भगवती आमा कामा
चार्वङ्गी टङ्कधारिणी तारा पार्वती यक्षिणी श्रीशारिका
भगवती श्रीशारदाभगवती श्रीमहाराज्ञी भगवती
श्रीज्वालाभगवती व्रीडाभगवती वैखरीभगवती
वितस्ताभगवती गङ्गाभगवती यमुनाभगवती
कालिकाभगवती सिद्धलक्ष्मीः महालक्ष्मीः महात्रिपुरसुन्दरी
सहस्रनाम्नी देवी भवानी सपरिवारा सवाहना सायुधा
साङ्गा प्रीयतां प्रीता स्तु

पुण्यं सहस्रनामेदमम्बाया रूद्रभाषितम् ।
चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रकाशितम् ॥१३५॥

नातः परतरो मन्त्रो नातः परतरः स्त्वः ।
नातः परतरा विद्या तीर्थं नात परात्परम् ॥१३६॥

ते धन्याः कृतपुण्यास्ते त एव भुवि पूजिताः ।
एकभाव मुदा नित्यं येर्चयन्ति महेश्वरीम् ॥१३७॥

देवतानां देवता या ब्रह्माद्यैर्या च पूजिता ।
भूयात्सा वरदा लोके साधूनां विश्वमंगला ॥१३८॥

एतामेव पुराराध्य विद्यां त्रिपुरभैरवीम् ।
त्रैलोक्यमोहनं रूपमकार्षीद्भगवद्धरिः ॥१३९॥

इति रूद्रयामले तन्त्रे नन्दिकेश्वरसंवादे महाप्रभावो भवानीनामसहस्रस्तवराज सम्पूर्णः

—०—

जय दुर्गे

01 SUNDAY – JUN

श्रीदुर्गासप्तशती

श्रीदुर्गायै नमः

(श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम्)

ईश्वर उवाच

शतनाम प्रवक्ष्यामि शृणुष्व कमलानने ।
यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत् सती ॥

ॐ सती साध्वी भवप्रीता भवानी भवमोचनी ।
आर्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी ॥

पिनाकधारिणी चित्रा चण्डघण्टा महातपा ।
मनो बुद्धिरहंकारा चित्तरूपा चिता चितिः ॥

सर्वमन्त्रमयी सत्ता सत्यानन्दस्वरूपिणी ।
अनन्ता भाविनी भाव्या भव्याभव्या सदागतिः ॥

शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा ।
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ॥

अपर्णानेकवर्णा च पाटला पाटलावती ।
पट्टाम्बरपरीधाना कलमञ्जीररञ्जिनी ॥

अमेयविक्रमा क्रूरा सुन्दरी सुरसुन्दरी ।
वनदुर्गा च मातङ्गी मातङ्गमुनिपूजिता ॥

ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा ।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥

विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा ।
बहुला बहुलप्रेमा सर्ववाहनवाहना ॥

निशुम्भशुम्भहननी महिषासुरमर्दिनी ।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी ॥
सर्वासुरविनाशा च सर्वदानवघातिनी ।
सर्वशस्त्रमयी सत्या सर्वास्त्रधारिणी तथा ॥
अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी ।

कुमारी चैककन्या च कैशोरी युवती यतिः ॥
अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा ।

महोदरी मुक्तकेशी घोररूपा महाबला ॥
अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ।
नारायणी भद्रकाली विष्णुमाया जलोदरी ॥

शिवदूती कराली च अनन्ता परमेश्वरी ।
कात्यायनी च सावित्री प्रत्यक्षा ब्रह्मवादिनी ॥

अथ देव्याः कवचम्

ॐ नमश्चण्डिकायै ॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिता ।

उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥
न तेषां जायते किंचिदशुभं रणसंकटे ।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥
यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥

प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥

माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥

श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥

इत्येता मातरः सर्वाः सर्वयोगसमन्विता ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥

खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥

दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।

नारसिंही महावीर्या शिवदूती महाबला ॥

महाबले महोत्साहे महाभयविनाशिनि ।
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥

प्राच्यां रक्षतु मामैन्द्री आग्नेरयामग्निदेवता ।
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥

प्रतीच्यां वारूणी रक्षेद् वायव्यां मृगवाहिनी ।
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ॥

ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ।
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥

जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥

शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ।
मालाधरी ललाटे च भ्रुवो रक्षेद् यशस्विनी ॥

नेत्रयोश्चित्रनेत्रा च यमघण्टा तु पार्श्वके ।
त्रिनेत्रा च त्रिशूलेन भ्रुवोर्मध्ये च चण्डिका ॥

08 SUNDAY

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शङ्करी ॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥

दन्तान् रक्षतु कौमारी कंठदेशे तु चण्डिका ।

घण्टिकां चित्रघण्टा च महामाया च तालुके ॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥

स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥

कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥

पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।

ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु ॥

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥

प्राणोपानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥

गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥

धनेश्वरी धनं रक्षेत कौमारी कन्यकां तथा ।
पन्थानं सुपथा रक्षेन्मार्गं क्षेमङ्करी तथा ॥

राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ।
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥

तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ।
सर्वरक्षाकरं पुण्यं कवचं सर्वदा जपेत् ॥

इदं रहस्यं विप्रर्षे भक्त्या तव मयोदितम् ।
पादमेकं न गच्छेत् तु यदीच्छेच्छुभमात्मनः ॥

कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ।

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥

यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥

— o —

अथार्गलास्तोत्रम्

ॐ नमश्चण्डिकायै ॥

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥

मधुकैटभविद्ध्वंसि विधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

धूम्रनेत्रवधे देवि धर्मकामार्थदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनी ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

नतेभ्यः सर्वदा भक्त्या चापर्णे दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

चण्डिके सततं युद्धे जयन्ति पापनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

देहि सौभाग्यमारोग्यं देहि देवि परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तञ्च मां कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

देवि प्रचण्डदोर्दण्डदैत्यदर्पनिषूदिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

भार्यां मनोरमां देहि मनोवृत्तानुसारिणीम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

तारिणीं दुर्गसंसारसागरस्य कलोद्भवाम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥

अथ तन्त्रोक्तं रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ॥

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥

विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥

ध्यानम्

ॐ कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

यस्या प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापत्मनां कृतधियां हृदयेषु बुद्धि ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

किं वर्णयाम तव रूपमचिन्त्यमेतत
किं चातिवीर्यमसुरक्षकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मुखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोष-
र्विद्यासि सा भगवती परमा हि देवि ॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवि त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥

मधासि देवि विदताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्री कैटभारिहृदयैक कृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरूषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोतु ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥

ध्यानम्

ॐ घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नाय चेन्दुरूपिण्यै सुखायै सततं नमः ॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषुच्छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥

ध्यानम्

ॐ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥

ध्यानम्

ॐ बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥

सर्वभूता यदा देवी स्वर्गमुक्ति प्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तये ॥

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥

कलाकाष्ठादिरूपेण प्रिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ।
वराहरूपिनि शिवे नारायणि नमोऽस्तु ते ॥

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ।

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥

शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे ।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥

ज्वालकरालमत्युग्रमशेषासुरसूदनम ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥

29 SUNDAY

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥

रोगानशेषानपहंसि तुष्टा
रूष्टा तु कामान सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं
कृत्वाम्बिके तत्प्रकरोति कान्या॥

विद्यासु शास्त्रेशु विवेकदीपे-
ष्वाद्येष वाक्येषु च का त्वदन्या।
ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥

रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम ॥

विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ते त्वयि भक्तिनम्रा ॥
देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनेव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥

क्षमा-प्रार्थना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाचैव न जानामि क्षम्यतां परमेश्वरि ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥
अपराधशतं कृत्वा जगदम्बेति चोच्चरेत ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥

॥ श्रीदुर्गार्पणमस्तु ॥

दुर्गा दुर्गार्तिशमनी दुर्गापद्विनिवारिणी ।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥
दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा ।
दुर्गमज्ञानदा दुर्गदैत्यलोकदवानला ॥
दुर्गमा दुर्गमालोका दुर्गमात्मस्वरूपिणी ।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता ॥
दर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी ।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी ॥
दुर्गमासुरसंहन्त्री दुर्गमायुधधारिणी ।
दुर्गमाङ्गी दुर्गमता दुर्गम्या दुर्गमेश्वरी ॥
दुर्गभीमा दुर्गभामा दुर्गभा दुर्गदारिणी ।
नामावलिमिमां यस्तु दुर्गाया मम मानवः ॥
पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरू ॥

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिम्-अहो

न चा-ह्वानं ध्यानं तद्-अपि च न जाने स्तुति-कथा ।

न जाने मुद्रास्ते तत्अपि न जाने विलपनं

परं जाने माता त्वत्ऽनुसरणं कलेश हरणम् ॥

विधिर् अज्ञानेन द्रविण- विरहेणा- लसतया

विधेया- शक्य- त्वात् तव चरणयो-र्या- च्युतिर्-अभूत ।

तत्- एतत् क्षन्तव्यं जननि सकलो- द्धारिणि शिवे

कुपुत्रो जायेत क्वचित-अपि कुमाता न भवति ॥

पृथिव्यां पुत्राः ते जननि बहवः सन्ति सरलाः

परं तेषां मध्ये विरल-तरलोऽहं तव सुतः ।

मदीयोऽयं त्यागः समउचितम् इदं नो तव शिवे

कुपुत्रो जायेत क्वचित-अपि कुमाता न भवति ॥

जगत् मातर्मातः तव चरण-सेवा न रचिता

न वा-दत्तं देवि द्रविणम्-अपि भूयः तव मया ।

तथापि त्वं स्नेहं मयि निर्-उपमं यत-प्रकुरूषे

05 SATURDAY • JULY

1997

कुपुत्रो जायेत क्वचित-अपि कुमाता न भवति ॥

परित्यक्ता देवा विविध- विध-सेवा- कुलतया

मया पंचाशीतेर्- अधिकम्-अपनीते तु वयसि ।

इदांनी चेत्-मातः तव यदि कृपा नापि भविता

निरालम्बो लम्बोदर जननि कं यामि शरणम् ॥

श्वपाको जल्पाको भवति मधु पाको- पमगिरा

निरा-तंको रंको विहरति चिरं कोटि- कनकैः ।

तवापर्णे कर्णे विशति मनु-वर्णे फलमिदं

जनः को जानीते जननि जपनीयं जपविधौ ॥

चित्ता-भस्मा-लेपो गरलम्-अशनं दिक्-पटधरो

जटाधारी कण्ठे भुजग पति हारी पशुपतिः ।

कपाली भूतेशो भजति जगत-ईशैक-पदवीं

06 SUNDAY

भवानि त्वत्-पाणिग्रहण- परिपाटी-फलम्-इदम् ॥

न मोक्षस्या- कांक्षा भव-विभव- वांछापि न पुनः

अतस्त्वां संयाचे जननि जननं यातु मम वै

JULY 1997

TU	WE	TH	FR	SA	SU	MO	TU	WE	TH	FR	SA	SU	MO	TU	WE	TH	FR	SA	SU	MO	TU	WE	TH	FR	SA	SU	MO	TU	WE	TH
01	02	03	04	05	06	07	08	09	10	11	12	13	14	15	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30	31

मृडानी रूद्राणी शिव शिव भवानीति जपतः ॥

नारा- धितासि विधिना विविधोप- चारैः

किं रूक्ष- चिन्तनपरै- र्न कृतं वचोभिः ।

श्यामे त्वम्- एव यदि किंचन मय्यनाथे

धत्से कृपाम्-उ- चितम्- अम्ब परं तवैव ॥

आपत्सु मग्नः स्मरणं त्वदीयं

करोमि दुर्गे करूण- र्णवेशि ।

नैतत् शठत्वं मम भावयेथाः

क्षुधा- तृषार्ता जननीं स्मरन्ति ॥

जगत्- अम्ब विचित्रम् -अत्र किं

परिपूर्णा करूणास्ति चेत्- मयि

अपराध- परम्परा - परम्

नहि माता समुपेक्षते सुतम् ॥

मत्- समः पातकी नास्ति पापघ्नी त्वत- समा- नहि

एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरू ॥

ॐ नमः

शिवाय

समानो मन्त्रस्समितिस्समानी ।
समानं मनस्सह चित्तमेषाम् ॥

समानी व आकूतिस्समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वस्सुसहासति ॥

Common be our prayer; Common be our end.
Common be our purpose; Common be our deliberations.

Common be our desires; Common be our hearts.
united be our intensions; Perfect be the union amongest us.

(Rig. Veda)

तेजोऽसि तेजो मयि धेहि। वीर्यमसि वीर्यं मयि धेहि।
बलमसि बलं मयि धेहि। ओजोऽसि ओजो मयि धेहि।
मन्युरसि मन्युं मयि धेहि। सहोसि सहो मयि धेहि ॥

O Lord, Thou art the embodiment of infinite energy; do Thou fill me with energy. Thou art the embodiment of infinite virility; do Thou endow me with virility. Thou art the embodiment of infinite Strength; do Thou bestow Strength upon me. Thou art the embodiment of infinite power, do Thou grant power unto me. Thou art the embodiment of infinite Courage; do Thou inspire me with Courage. Thou art the embodiment of fortitude; do Thou Steel me with fortitude.

(Yujar Veda)

[illegible]

13 SUNDAY

शंकर पूजन

शंकर भगवान पर जल चढ़ाते हुए पढ़ें

असंख्याताः सहस्राणि ये रुद्रा अधि भूम्याम
तेषां सहस्रयोजनेव धन्वानि तन्मसि (1)
यो रुद्रो अग्नो य अप्सु य औषधीषु यो वनस्पतिषु
यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोअस्तुदेवाः
भवायदेवाय शर्वायदेवाय रुद्रायदेवाय पशुपतये- (2)
देवाय उग्रायदेवाय महादेवाय भीमायदेवाय
ईशानायदेवाय पार्वती सहिताय परमेश्वराय
जलं समर्पयामि नमः।

नेत्र स्पर्श करते हुए पढ़ें

तेजोरूप महेशान सोमसूर्याग्निलोचन प्रकाशाय
परंतेजो नेत्रस्पर्शेन शंकर। भवायदेवाय उमा-
सहिताय शिवाय पार्वतीसहिताय परमेश्वराय
नेत्रस्पर्शं परिगृह्णामि नमः।

भगवान को तिलक लगाते हुए पढ़ें

सर्वेश्वर जगद्वन्द्य दिव्यासन सुसंस्थित। गं गन्ध
गृहान देवेश दिव्यगन्धोपशोभितम। भवाय
देवाय उमा सहिताय शिवाय पार्वती सहिताय
परमेश्वराय समालभनं गन्धो नमः।

फूल चढ़ाते हुए पढ़ें

सदाशिव शिवानन्द प्रधान करणेश्वर।
पुष्पाणि बिल्वपत्राणि विचित्राणि गृहाण मे।
भवाय देवाय उमा सहिताय शिवाय पार्वती सहिताय
परमेश्वराय पुष्प समर्पयामि नमः।

IMP. NOTES

रत्नदीप कपूर चढाते हुए पढें

हिरण्यबाहो सेनानीः औषधीनां पते शिव। दीपं गृहाण कर्पूर कपिलाज्य त्रिवर्तिकम। भवाय देवार्य उमा सहिताय शिवाय पार्वती सहिताय परमेश्वराय रत्नदीप कर्पूरं परिकल्पयामि नमः।

पुष्पांजलि

आत्मा त्वं गिरिजामतिः सहचरा प्राणःशरीरं गृहं
पूजा ते विषयोपिभोगरचना निद्रा समाधि स्थितिः।
संचारः पदयोः प्रदक्षिणविधि स्तोत्राणि सर्वा गिरो,
यत् यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्॥

पुष्पाणि सन्तु तव देव ममेन्द्रियाणि
धूपो गुरू र्वपुरिदं हृदयं प्रदीपः
प्राणान हविंषि करणानि नवाक्षतानि
पूजा फलं व्रजतु साम्प्रतमेष जीवः॥

जन्मानि सन्तु मम देव शताधिकानि
माया च मे विशतु चित्तमबोध हेतु
किन्तु क्षणार्धमपि त्वच्चरणारविन्दात
मा पैतु मे हृदयमीश नमो नमस्ते॥

प्रणतोस्मि ....
मृत्युंजय ...
कर्पूर गौरं ...
हर शम्भो ...
तव तत्त्वं न जानामि कीदृशोसि महेश्वर,
यादृशोसि महादेव तादृशाय नमो नमः।
आद्यीनाम ...
असित गिरि ...
कर चरण ...

IMP. NOTES

विष्णु प्रार्थना

शान्ताकारं ...
यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनं ।
शंखः करतले यस्य स मे विष्णुः प्रसीदतु ।
यद्बाल्ये यश्च कौमारे यत यौवने कृतं मया
वय परिणतो यश्च यश्च जन्मान्तरेषु च ।
कर्मणा मनसा वाचा यापापं समुपार्जितं तन्नाशय
तन्नारायण गोविन्द क्षमस्व गरुडध्वज ।
त्वमेव माता ...
तत्रैव गंगा यमुना चवेणी
गोदावरी सिंधु सरस्वतीच,
सर्वाणि तीर्थानि वसन्ति तत्र
यत्रेच्युतोदार कथा प्रसंगा ।
नमामि नारायण पादपंकजं
करोमि नारायण पूजनं सदा ।
वदामि नारायण नाम निर्मलं
स्मरामि नारायण तत्व अव्ययम् ।
गोकोटिदानं ग्रहणेषु काशी
प्रयागं गंगाऽयुतकल्पवासः ।
यज्ञायतं मेरु सुवर्णदानम्
गोविंदनाम्ना न कदापि तुल्यम् ।।
ध्येयः सदा सवितृमंडल मध्यवर्ती
नारायणः सरसिजासन सन्निविष्टः ।
केयूरवान कनक कुण्डलवान किरीटी
हारी हिरण्य वपुर्धृत शङ्खचक्रः ।
करारबिन्देन पदारबिन्दं
मुखारबिन्दं विनिवेशयन्तं ।
अश्वत्थपत्रस्य पुटेशयानं
बालं मुकुन्दं मनसा स्मरामि ।।
गोविन्द गोविन्द हरे मुरारी गोविन्द गोविन्द रथांगपाणे ।
गोविंद गोविन्द मुकुंद कृष्ण
गोविन्द गोविन्द नमो नमस्ते

ध्येयं सदा परिभवघ्नं अभीष्टदोहं
तीर्थास्पदं शिव विरिञ्चि नुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं
वन्दे महापुरुष ते चरणारबिन्दम् ॥१॥

त्यक्त्वा सुदुस्त्यज सुरेप्सित राज्यलक्ष्मीं
धर्मिष्ठ आर्य वचसा यत अगात अरण्यम ।
मायामृगं दयित येप्सितं अनुधावत
वन्दे महापुरुष ते चरणारबिन्दम् ॥२॥

श्रीमत सरोरुह यवाँकुश चक्र चाप
मत्स्याङ्कितं नवविल्लोहित पल्लवाभम् ।
लक्ष्म्यालयं परममंगलं आत्मरूपम
वन्दे महापुरुष ते चरणारबिन्दम् ॥३॥

वृन्दावनान्तरं अगात अनुगोकुलानां
संचार्य सर्वपशुभिः स्वविवृद्ध कामी ।
संचिन्तयत अगगर्रो मृगपक्षिणां यत
वन्दे महापुरुष ते चरणारबिन्दम् ॥४॥

यत गोपिका विरह जाग्नि परीतदेहाः
तप्तस्तनेषु विजहुः परिरभ्य तापम ।
रासे तदीय कुच कुँकम पङ्कलिप्तं
वन्दे महापुरुष ते चरणारबिन्दम् ॥५॥

कालीय मस्तक विघटन दक्षम अस्य
मोक्षेप्सुभि विरहदीन मुखाभिर आरात ।
तत पत्निभिः स्तुतम शेष निकामरूपं
वन्दे महापुरुषते चरणारबिन्दम् ॥६॥

IMP. NOTES

ज्ञानालयं श्रुतिविमृग्यं अनादिम अव्ययम्
ब्रह्मादिमि हृदि विचन्त्यं आगाध बोधैः
संसार कूप पतितो तरणाव लम्बम्
वन्दे महापुरुष ते चरणारबिन्दम् ॥7॥

येनाङ्क बालवपुषः स्तनपान बुद्धेः
त्वत् अँघ्रिणा हृतमऽनो विपरीत चक्रम ।
विध्वस्त भाण्डम अपतत भवि गोपमूर्तै
वन्दे महापुरुष ते चरणारबिन्दम् ॥8॥

इत्यष्टकं पठति यः परमस्य पुंसो
नारायणस्य निरयार्णव तारणस्य ।
सर्वाप्तिमाशु हृदये कुरुते मनुष्यः
संप्राप्य देहविलयं लभते च मोक्षम् ॥9॥

उत्तिष्ठो त्तिष्ठ गोविन्द उत्तिष्ठ गरुड ध्वज उत्तिष्ठ कमलाकान्त
त्रैलोक्ये मंगलं कुरु (1)
मंगलं भगवान विष्णुः ..... (2)
मूकं करोति ...... (3)
नमो ब्रह्मण्य देवाय गौब्राह्मण हिताय च जगत् हिताय कृष्णाय
गोविन्दाय नमो नमः (4)
कृष्णाय वासुदेवाय देवकी नन्दनाय च नन्दगोपकुमाराय
गोविन्दाय नमो नमः (5)

IMP. NOTES

आधीनामगदं दिव्यं व्याधीनां मूलकुन्तनम् ।
उपद्रवाणाम् दलनं महादेवम् उपास्महे ॥

अहं पापी पापक्षपणनिपुणः शंकर भवान्
अहं भीतो भीताभयवितरणे ते व्यसनिता ।
अहं दीनो दीनोद्धरणविधिसज्जस्त्वमितरन्
न जानेहं वक्तुं कुरू सकल शौचे मयि कृपाम् ॥

जनास्त्वत्पादाब्जश्रवणमननध्याननिपुणाः
स्वयं ते निस्तीर्णा न खलु करूणा तेषु करूणा ।
भवे लीने दीने मयि मननहीने न करूणा
कथं नाथ ख्यातः त्वमसि करूणासागर इति ॥

॥ अथ श्री शिवमहिम्नस्तोत्रम् ॥

ओं श्री गणेशाय नमः

। श्री पुष्पदन्त उवाच ।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिनामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवाद परिकर : ॥१॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परमममृतं निर्मितवत
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ॥५॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन वरिवसितरि त्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽऽसीद् यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद् भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्रा प्रभुधियः ॥१८॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

अपूर्वं लावण्यं विवसनतनोस्ते विमृशतां
मुनीनां दाराणां समजनि स कोऽपि व्यतिकरः ।
यतो भग्ने गुह्ये सकृदपि सपर्यां विदधतां
ध्रुवं मोक्षोपलीलं किमपि पुरूषार्थं प्रसवि ते ॥२३॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना -
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२४॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराः
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥२५॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरूतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२६॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह -
स्त्वमापस्त्वं व्योम त्वम धरणिरात्मा त्वमिति च ।

परिच्छिन्नमेवं त्वयि परिणता बिभ्रति गिरं
न विधमस्तत्तत्त्वं वयमिह तु यत् त्वं न भवसि ॥२७॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा -
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरून्धानमणुभि
समस्तं व्यस्तं त्वां शरणद गृणात्योमितिपदम् ॥२८॥

भवः शर्वो रूद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२९॥

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे नैवाहं क्वचिदपि भवन्त प्रणतवान् ।
नमन्मुक्तः संप्रत्यतनुरहमग्रेऽप्यनतिमान्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥३०॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमो ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमतिसर्वाय च नमो ॥३१॥

बहुलरजसे विश्वोतपत्तौ भवाय नमो नमः
प्रबलतमसे ततसंहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३२॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३३॥

असितगिरिसमं स्यात कज्जलं सिन्धुःपात्रे
सुरतरूवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३४॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
ग्रंथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३५॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत
पठति परमभक्त्या शुद्धचित्तः पुमान यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनाढ्यः पुत्रवान् कीर्तिमांश्च ॥३६॥

महेशान्नापरो देवो महिम्नो नापरा स्तुति ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥३७॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रिया ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३८॥

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ॥३९॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ।
व्रजति शिवसमीप किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥४०॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥४१॥

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयो ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४२॥

श्रीपुष्पदन्तमुखपंकजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेन ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥४३॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥४४॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥४५॥

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥४६॥

इति श्रीपुष्पदन्तविरचितं शिवमहिम्नः स्तोत्रं समाप्तम् ॥

ॐ शान्तिः शान्तिः शान्तिः

आशा के सम्बल में

॥श्रीरुद्रम्॥

ॐ नमः शिवाय ।

प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव। निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते॥ देवं सुधा कलशसोमकरं त्रिनेत्रं पद्मासनं च वरदऽभयदं सुशुभ्रम्। शङ्खाऽभयावरभूषितया च देव्या वामेऽङ्कितं शमनभङ्गहरं नमामि॥ शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्। गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम्। व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम्॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिकम्। ज्वलन्तं पिङ्गलजटाशिखमुद्योतकारिणम्॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम्। दिव्यसिंहासनसीनं दिव्यभोगसमन्वितम्॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम्। नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमऽव्ययम्॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम्। एवं ध्यात्वा द्विजः सम्यक्ततो यजनमारभेत्॥ मृत्युञ्जय महादेव

पाहि मां शरणागतम् । जन्ममृत्युजरारोगैः
पीडितं भवबन्धनात् ॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देव-
र्महर्षिभिः । आवाहयामि भक्त्या त्वां गृहाणार्चां
महेश्वर ॥ हर शम्भो महादेव विश्वेशामरवल्लभ । शिव शङ्कर
सर्वात्मन् नीलकण्ठ नमोस्तु ते ॥ इति विज्ञाप्य देवेशं
जपेन्मन्त्रं च त्र्यम्बकम् ॥ ॐ त्र्यम्बकं यजामहे
सुगन्धिं पुष्टिवर्धनं । उर्वारुकमिव बन्धनान्मृत्योर्-
मुक्षीय माऽमृतात ॥३॥

ॐ आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह
केतुमद्भिर्वाताजवेन बलमद्भिर्मनोजवा यान्तु शीघ्रं मम
रूद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं
सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् ॥

27 SUNDAY

आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् । वृषभासनमारूढं
नागाभरणभूषितम् ॥ प्रीयतां यजमानस्य तुष्टो
भूयाज्जगत्पतिः । शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः ।

बलिः पुष्पं चरूश्चैव धूपोऽयं प्रतिगृह्यताम् ॥

ॐ तत्पुरूषाय विद्महे महादेवाय धीमहि तन्नो रूद्रः प्रचोदयात ॥३॥

ॐ शतरूद्रियन्देवानां रूद्रशमनं भवाय शर्वायैश्च प्रत्युत्क्रान्तानुवाकौ देवर्षी रूद्रदैवत्यस्त्रिष्टुपच्छन्दश्चयने विनियोगः, नमस्ते देवा रौद्रमनुष्टुभमाद्या गायत्री पञ्चमषष्ठ्यौ पांक्तयन्ता महापंक्तिर्मा मैरेकपदा जगत्यनुष्टुप त्रिष्टुप् महाबृहती यवमध्या रूद्रो देवता चरूमेष्टिका, अस्य रूद्रस्य प्रश्नस्य अनुष्टुप्छन्दः अघोर ऋषिः सङ्कर्षणमूर्तिः सरूपो योऽसावादित्यः परः परूषः सएव देवता, अग्निः क्रतुचरूमायामिष्टिकायां शतरूद्रे विनियोगः, सकलस्य रूद्राध्यायस्य श्रीमहारूद्रो देवता एका गायत्रीं छन्दस्तिस्रोऽनुष्टुभस्तिस्रः पङ्क्तयः सप्ताऽनुष्टुभौ द्वे जगत्यौ परमेष्ठी ऋषि। आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थमुक्कामनासिद्ध्यर्थे रूद्रमन्त्रपाठे विनियोगः ॥

ॐ कर्पूरगौरं करूणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

श्रीरूद्रम्

॥ नमकम् ॥

ॐ गणानां त्वा गणपतिँ हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादनम् ॥

ॐ नमो भगवते रूद्राय ।

प्रथमोऽनुवाकः।

ॐ नमस्ते रूद्र मन्यव उतो त इषवे नमः। नमस्ते
अस्तु धन्वने बाहुभ्यामुत ते नमः॥ या त इषुः शिवतमा
शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो
रूद्र मृडय॥ या ते रूद्र शिवा तनूरघोराऽपापकाशिनी। तया
नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि॥ यामिषुं गिरिशंत
हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरू मा हिँसीः
पुरूषं जगत्॥ शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत्॥ अध्यवो-
चदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्जम्भय-
न्त्सर्वाश्च यातुधान्यः॥ असौ यस्ताम्रो अरूण उत बभ्रुः
सुमङ्गलः। ये चेमाँ रूद्रा अभितो दिक्षु श्रिताः
सहस्रशोऽवैषाँ हेड ईमहे॥ असौ योऽवसर्पति नीग्रीवो
विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा
भूतानि स दृष्टो मृडयाति नः॥ नमो अस्तु नीलग्रीवाय

सहस्राक्षाय मीढुषे । अथो य अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥ अवतत्य धनुस्त्वँ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत । अनेशन्नस्येषव आभुरस्य निषङ्गधिः ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥१॥

नमस्ते अस्तु भगवन्विश्वेश्वराय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकालाग्नि कालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमनमहादेवाय नमः

 द्वितीयोऽनुवाकः।

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो। नमो
वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो। नमः सस्पिञ्जराय
त्विषीमते पथीनां पतये नमो। नमो बभ्लुशाय विव्या-
धिनेऽन्नानां पतये नमो। नमो हरिकेशायोपवीतिने पुष्टानां
पतये नमो। नमो भवस्य हेत्यै जगतां पतये नमो। नमो
रूद्रायाततताविने क्षेत्राणां पतये नमो। नमः सूतायाहन्त्याय
वनानां पतये नमो। नमो रोहिताय स्थपतये वृक्षाणां
पतये नमो। नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो।
नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो। नम
उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो। नमः कृत्स्नवीताय
धावते सत्त्वनां पतये नमः ॥२॥

तृतीयोऽनुवाकः।

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो।
नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो। नमो
निषङ्गिण इषुधिमते तस्कराणां पतये नमो। नमो वञ्चते

1997

परिवञ्चते स्तायूनां पतये नमो। नमो निचेरवे प्रिचरायारण्यानां पतये नमो। नमः सृकाविभ्यो जिघाँसद्भयो मुष्णतां पतये नमो। नमोऽसिमद्भयो नक्तं चरद्भयः प्रकृन्तानां पतये नमो। नमः उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो। नमः इषुमद्भयो धन्वाविभ्यश्च वो नमो। नमः आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो। नमः आयच्छद्भयो विसृजद्भयश्च वो नमो। नमोऽस्यद्भयो विध्यद्भयश्च वो नमो। नमः आसीनेभ्यः शयानेभ्यश्च वो नमो। नमः स्वपद्भयो जाग्रद्भयश्च वो नमो। नमस्तिष्ठद्भयो धावद्भयश्च वो नमो। नमः सभाभ्यः सभापतिभ्यश्च वो नमो। नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥३॥

चतुर्थोऽनुवाकः।

नमः आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो। नम उगणाभ्यस्तृँहतीभ्यश्च वो नमो। नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो। नमो व्रातेभ्यो व्रातपतिभ्यश्च

वो नमो। नमो गणेभ्यो गणपतिभ्यश्च वो नमो।

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो। नमो महद्भ्यः

क्षुल्लकेभ्यश्च वो नमो। नमो रथिभ्योऽरथेभ्यश्च वो नमो।

नमो रथेभ्यो रथपतिभ्यश्च वो नमो। नमः सेनाभ्यः

सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च

वो नमो। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो। नमः

कुलालेभ्यः कर्मारेभ्यश्च वो नमो। नमः पुञ्जिष्टेभ्यो

निषादेभ्यश्च वो नमो। नमः इषुकृद्भ्यो धन्वकृभ्दयश्च

वो नमो। नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो। नमः

श्वभ्यः श्वपतिभ्यश्च वो नमः ॥४॥

पञ्चमोऽनुवाकः।

नमो भवाय च रूद्राय च। नमः शर्वाय च पशुपतये

च। नमो नीलग्रीवाय च शितिकण्ठाय च। नमः

कपर्दिने च व्युप्तकेशाय च। नमः सहस्राक्षाय च

शतधन्वने च। नमो गिरिशाय च शिपिविष्टाय च।

नमो मीढुष्टमाय चेषुमते च। नमो ह्रस्वाय च वामनाय च। नमो बृहते च वर्षीयसे च। नमो वृद्धाय च संवृध्वने च। नमो अग्रियाय च प्रथमाय च। नमः आशवे चाजिराय च। नमः शीघ्रियाय च शीभ्याय च। नमः ऊर्म्याय चावस्वन्याय च। नमः स्रोतस्याय च द्वीप्याय च ॥५॥

षष्ठोऽनुवाकः।

नमो ज्येष्ठाय च कनिष्ठाय च। नमः पूर्वजाय चापरजाय च। नमो मध्यमाय चापगल्भाय च। नमो जघन्याय च बुध्नियाय च। नमः सोभ्याय च प्रतिसर्याय च। नमो याम्याय च क्षेम्याय च। नमः उर्वर्याय च खल्याय च। नमः श्लोक्याय चावसान्याय च। नमो वन्याय च कक्ष्याय च। नमः श्रवाय च प्रतिश्रवाय च। नमः आशुषेणाय चाशुरथाय च। नमः शूराय चावभिन्दते च। नमो वर्मिणे च वरूथिने च। नमो बिल्मिने च कवचिने च। नमः श्रुताय च श्रुतसेनाय च ॥६॥

सप्तमोऽनुवाकः।

नमो दुन्दुभ्याय चाहनन्याय च। नमो धृष्णवे च प्रमृशाय च।
नमो दूताय च प्रहिताय च। नमो निषङ्गिणे चेषुधिमते च।
नमस्तीक्ष्णेषवे चायुधिने च। नमः स्वायुधाय च सुधन्वने च।
नमः स्रुत्याय च पथ्याय च। नमः काट्याय च नीप्याय च।
नमः सूद्याय च सरस्याय च। नमो नाद्याय च वैशन्ताय च।
नमः कूप्याय चावट्याय च। नमो वर्ष्याय चावर्ष्याय च।
नमो मेघ्याय च विद्युत्याय च। नमः ईध्रियाय चातप्याय च।
नमो वात्याय च रेष्मियाय च। नमो वास्तव्याय च वास्तुपाय च॥७॥

अष्टमोऽनुवाकः।

नमः सोमाय च रुद्राय च। नमस्ताम्राय चारुणाय च।
नमः शङ्गाय च पशुपतये च। नमः उग्राय च भीमाय च। नमो
अग्रेवधाय च दूरेवधाय च। नमो हन्त्रे च हनीयसे च। नमो
वृक्षेभ्यो हरिकेशेभ्यो। नमस्ताराय। नमः शम्भवे च मयोभवे
च। नमः शङ्कराय च मयस्कराय च। नमः शिवाय च शिवतराय च।
नमस्तीर्थ्याय च कूल्याय च। नमः पार्याय चावार्याय च।

नमः प्रतरणाय चोत्तरणाय च । नमः आतार्याय

चालाद्याय च । नमः शष्प्याय च फेन्याय च । नम सिकत्याय च

प्रवाह्याय च ॥८॥

नवमोऽनुवाकः ।

नमः इरिण्याय च प्रपथ्याय च । नमः किँशिलाय च खयणाय च ।

नमः कपर्दिने च पुलस्तये च । नमो गोष्ठ्याय च गृह्याय च ।

नमस्तल्प्याय च गेह्याय च । नमः काट्याय च गह्वरेष्ठाय च ।

नमो ह्रदय्याय च निवेष्प्याय च । नमः पाँसव्याय च रजस्याय च ।

नमः शुष्क्याय च हरित्याय च । नमो लोप्याय चोलप्याय च ।

नमः ऊर्व्याय च सूर्म्याय च । नमः पर्ण्याय च पर्णशद्याय च ।

नमोऽपगुरमाणाय चाभिघ्नते च । नमः आक्खिदते च प्रक्खिदते च ।

नमो वः किरिकेभ्यो देवानाँ ह्रदयेभ्यो । नमो विक्षीणकेभ्यो । नमो

विचिन्वत्केभ्यो । नम आनिर्हतेभ्यो । नम आमीवत्केभ्यः ॥९॥

दशमोऽनुवाकः ।

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां परुषाणामेषां पशूनां

मा मेमाँऽरो मो एषां किञ्चनाममत ॥ या ते रूद्र शिवा तनूः
शिवा विश्वाहभेषजी । शिवा रूद्रस्य भेषजी तया नो मृड
जीवसे ॥ इमाँ रूद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम ।
यथा नः शमसद द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम ॥
मृडा नो रूद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रूद्र प्रणीतौ ॥
अर्भकं मा न
मा नो महान्तमुत मा ना उक्षन्तमुत मा न उक्षितम् । मा
नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रूद्र
रीरिपः ॥ मा नस्तोके तनये मा न आयुषि मा नो
गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रूद्र भामितो
वधीर्हविष्मन्तो नमसा विधेम ते ॥ आरात्ते गोघ्न उत
पूरूघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो
अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥
स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रूद्र स्तवानो अन्यं ते अस्मन्निपन्तु सेनाः ॥

परि णो रूद्रस्य हेतिर्वृणक्तु परि त्वषस्य
दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय
तनयाय मृडय॥ मीढुष्टम शिवतम शिवो नः सुमना भव।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि॥ विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते
सहस्रँ हेतयोऽन्यमस्मन्निवपन्तु ताः॥ सहस्राणि सहस्रधा
बाहवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखाकृधि॥१०॥

एकादशोऽनुवाकः

सहस्राणि सहस्रशो ये रूद्रा अधि भूम्याम। तेषाँ सहस्रयोजनेऽव
धन्वानि तन्मसि॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचाराः॥ नीलग्रीवाः
शितिकण्ठा दिवँ रूद्रा उपाश्रिताः॥ ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा
विलोहिताः॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः॥ ये
अन्नेषु विविद्यन्ति पात्रेषु पिबतो जनान्॥ ये पथां
पथिरक्षय एलबृदा यव्युधः॥ ये तीर्थानि प्रचरन्ति सृकावन्तो

निषङ्गिणः ॥ य एतावन्तश्च भूयाँसश्च दिशो रूद्रा वितस्थिरे ।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥ नमो रूद्रेभ्यो ये
पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो
दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो
नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि ते वो
जम्भे दधामि ॥१२॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

यो रूद्रो अग्नौ यो अप्सु य औषधीषु यो
रूद्रो विश्वा भुवना विवेश तस्मै रूद्राय नमो अस्तु ॥

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति
भेषजस्य ॥ यक्ष्वामहे सौमनसाय रूद्रं नमोभि-
र्देवमसुरं दुवस्य ॥ अयं मे हस्तो भगवानयं
मे भगवत्तरः । अयं मे विश्वभेषजोऽयँ शिवाभिमर्शनः ।
10 SUNDAY
ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान्यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे
स्वाहा मृत्यवे स्वाहा । ॐ नमो भगवते रूद्राय
विष्णवे मृत्युर्मे पाहि । प्राणानां ग्रन्थिरसि रूद्रो मा
विशान्तकः तेनान्नेनाप्यायस्व ॥

नमो रूद्राय विष्णवे मृत्युर्मे पाहि ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ चमकम् ॥

प्रथमोऽनुवाकः अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे

मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म सहश्च म

आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे

वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूँषि च मे

शरीराणि च मे ॥१॥

द्वितीयोऽनुवाकः ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च

मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे

प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे

वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे

वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे

जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे

वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं

च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे

सुमतिश्च मे ॥२॥

तृतीयोऽनुवाकः शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मे यक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥३॥

चतुर्थोऽनुवाकः

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे

कुयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे
यवाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे
गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे
श्यामाकाश्च मे नीवाराश्च मे ॥४॥

पञ्चमोऽनुवाकः अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे
सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे
सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च
म आपश्च मे वीरुधश्च मे ओषधयश्च मे कृष्टपच्यं
च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च
यज्ञेन कल्पन्तां वित्तं च मे, वित्तिश्च मे भूतं च मे
भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे
शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥५॥

षष्ठोऽनुवाकः अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म
इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे
बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म

सुमतिश्च मे ॥२॥

तृतीयोऽनुवाकः शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मे यक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥३॥

चतुर्थोऽनुवाकः

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे

कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे
यवाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे
गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे
श्यामाकाश्च मे नीवाराश्च मे ॥४॥

पञ्चमोऽनुवाकः अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे
सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे
सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च
म आपश्च मे वीरुधश्च मे ओषधयश्च मे कृष्टपच्यं
च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च
यज्ञेन कल्पन्तां वित्तं च मे, वित्तिश्च मे भूतं च मे
भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे
शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥५॥

षष्ठोऽनुवाकः अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म
इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे
बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म

इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे
विष्णुश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे
विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मे-
ऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च
म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म
इन्द्रश्च मे ॥६॥

सप्तमोऽनुवाकः अँशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाँशुश्च
मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म
आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च
म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च
म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च
मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे
सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे
पात्नीवतश्च मे हारियोजनश्च मे ॥७॥

अष्टमोऽनुवाकः इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवने च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥८॥

नवमोऽनुवाकः अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम ॥९॥

दशमोऽनुवाकः गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट च मे

तुर्यौही च मे षष्ठवाच्च मे षष्ठौही च म उक्षा च
मे वशा च म ऋषभश्च मे वेहच्च मेऽनडवाञ्च मे
धेनुश्च मे आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो
यज्ञेन कल्पतां व्यायो यज्ञेन कल्पतां चक्षुर्यज्ञेन
कल्पताँ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां
वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो
यज्ञेन कल्पताम ॥२०॥

एकादशोऽनुवाकः एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव
च म एकादश च मे त्रयोदश च मे पञ्चदश च मे
सप्तदश च म एकविँशतिश्च मे त्रयोविँशतिश्च मे
पञ्चविँशतिश्च मे सप्तविँशतिश्च मे नवविँशतिश्च मे
एकत्रिँशाच्च मे त्रयस्त्रिँशाच्च मे चतस्रश्च मेऽष्टौ
च मे द्वादश च मे षोडष च मे विँशतिश्च मे
चतुर्विँशतिश्च मेऽष्टाविँशतिश्च मे द्वात्रिँशाच्च मे
षट्त्रिँशाच्च मे चत्वारिँशाच्च मे चतश्चत्वारिँशाच्च

17 SUNDAY

मेऽष्टाचत्वारिँशाच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च
सुवश्च मूर्धा च व्याश्नियश्चान्त्यायनश्चान्त्यश्च
भौवनश्च भुवनश्चाधिपतिश्च ॥२२॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरूक्थामदानि
शँसिषद्विश्वेदेवाः सूक्तवाचः पृथिवि मातर्मा मा
हिँसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु
वदिष्यामि मधुमतीं देवेभ्योवाचमुद्यासं शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै

ॐ शान्तिः शान्ति शान्तिः

सद्गुरू महाराज की जय

भज गोविन्दं

- दिनमपि रजनी सायं प्रातः
  शिशिरवसन्तौ पुनर आयातः।
  कालः क्रीडति गच्छति आयु
  तदपि मुञ्चति आशावायु ॥
  भज गोविन्दम, भज गोविन्दम गोविन्दम भज मूढमते !

- प्राप्ते सन्निहिते मरणे
  नहि नहि रक्षति डुकृञ करणे ।
  अग्रे वह्निः पृष्ठे भानू
  रात्रौ चिबुक समर्पित जानूः
  करतल भिक्षा तरू तल वासः
  तदपि न मुञ्चति आशा पाशः ॥
  भज गोविन्दम .....

- यावत वित्तोपार्जन सक्तः
  तावत निज परिवारो रक्तः।
  पश्चात धावति जर्जर देहे
  वार्ता पृच्छति कोऽपि न गेहे ।
  भज गोविन्दम .....

- जटिलो मुण्डी लुञ्चित केशः
  काषायाम्बर बहु कृत वेषः ।
  पश्यन्नपि च न पश्यति मूढ
  उदर निमित्तं बहु कृत वेष ।
  भज गोविन्दम .....

- भगवत गीता किञ्चित अधीता
  गङ्गा जल लव कणिका पीता ।
  सकृदपि यस्य मुरारि समर्चा
  तस्य यमः किं कुरुते चर्चां ।
  भज गोविन्दम .....

IMP. NOTES

- अङ्गं गलितं पलितं मुण्डं
  दशनविहिनं जातं तुण्डम्
  वृद्धो याति गृहीत्वा दण्डं
  तदपि न मुञ्चति आशा पिण्डम्।
  भज गोविन्दम्

- बालः तावत क्रीडा सक्तः
  तरूणः तावत तरूणी रक्तः।
  वृद्धः तावत् चिन्ता मग्नः
  परमे ब्रह्मणि कोऽपि न लग्नः।
  भज गोविन्दम .....

- पुनरपि जननं पुनरपि मरणं
  पुनरपि जननी जठरे शयनम्।
  इह संसारे खलु दुस्तारे
  कृपयाऽपारे पाहि मुरारे।
  भज गोविन्दम् .....

- पुनरपि रजनी पुनरपि दिवसः
  पुनरपि पक्षः पुनरपि मासः।
  पुनरपि अयनं पुनरपि वर्षं
  तदपि न मुञ्चति आशामर्षम्।
  भज गोविन्दम् .....

- वयसि गते कः कामविकारः
  शुष्के नीरे कः कासारः
  नष्टे द्रव्ये कः परिवारो
  ज्ञाते तत्वे कः संसारः।
  भज गोविन्दम .....

IMP. NOTES

- नारीस्तन भर नाभि निवेशं
  मिथ्या माया मोह वेशं
  एतत मांसं वसादि विकारं
  मनसि विचारय बारम बारम।
  भज गोविन्दम .....

- कः त्वं कोऽहं कुत आयातः
  का मे जननी को मे तातः।
  इति परि भावय सर्वम असारं
  विश्वं त्यक्त्वा स्वप्न विचारम।
  भज गोविन्दम् .....

- गेयं गीता नाम सहस्रम
  ध्येयं श्री पति रूप अजस्रम्।
  नेयं सज्जन सङ्गे चित्तं
  देयं दीन जनाय च वित्तम्।
  भज गोविन्दम .....

- यावत जीवो निवसति देहे
  कुशलं तावत पृच्छति गेहे।
  गत वति वायौ देहापाये
  भार्या बिभ्यति तस्मिन काये।
  भज गोविन्दम् .....

- सुखतः क्रियते रामा भोगः
  पश्चात हन्त शरीरे रोगः
  यद्यपि लोके मरणं शरणं
  तदपि न मुञ्चति पापा चरणम्
  भज गोविन्दम .....

IMP. NOTES

- कुरुते गङ्गासागर गमनं व्रत परि पालनम अथवा दानम्
  ज्ञानविहीनः सर्व मतेन मुक्ति न भवति जन्मशतेन
  भज गोविन्दं भज गोविन्दं, गोविन्द भज मूढमते

द्वादशपञ्जरिकास्तोत्रम्

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥भज॥
अर्थमनर्थं भाय नित्यं नास्ति सुखलेशः सत्यम ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः ॥ भज०॥
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ॥भज०॥
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ भज०॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ भज०॥
सुरमन्दिरतरुमूल निवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ भज०॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ भज०॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् । भज०॥
प्राणायामं प्रत्यहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ भज०॥
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ भज०॥

का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता ।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥भज०॥
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥भज०॥
द्वादशपञ्जरिकामय एषः शिष्याणां कथितो ह्युपदेशः ।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम् ॥भज०॥

3

श्रीरामस्तुतिः

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्री रामं भूयो भूयो नमाम्यहम् ॥
रामाय रामभद्राय रामचन्द्राय मानसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
नीलाम्बुजश्यामलकोमलाङ्गं ।
सीतासमारोपितवामभागम् ॥
पाणौ महासायकचारुचापं ।
नमामि रामं रघुवंशनाथम् ॥

- श्रीरामचन्द्रं सततं नमामि, सुग्रीवमित्रं परमं पवित्रं,
  सीताकलत्रं नवमेघ गात्रम्, कारुण्य पात्रं शतपत्र नेत्रं,
  श्रीरामचन्द्रं सततं नमामि (1)
- संसार सारं निगम प्रचारं धर्मावतारं हृतभूमि भारम् ।
  सदाविकारं सुखसिन्धु सारं, श्रीरामचन्द्रं ..... (2)
- लक्ष्मी विलासं जगतां निवासं लंकाविनाशं भुवन प्रकाशम् ।
  भू देव वासं शरत इन्दुहासं, श्रीरामचन्द्रं .....
- मन्दार मालं वचने रसालं गुणैर्विशालं हत सप्ततालं
  क्रव्याद कालं सुर लोकपालं, श्रीरामचन्द्रं .....
- वेदान्त गानं सकलैः समानं हतारि मानं त्रिदश
  प्रधानम् । गजेन्द्र यानं विगतावसानं श्रीरामचन्द्रं .....
- श्यामाभि रामं नयनाभि रामं गुणाभिरामं वचनाभिरामं ।
  विश्व प्रणामं कृतभक्तकामं, श्रीरामचन्द्रं

IMP. NOTES

- लीलाशरीरं रणरंगधीरं, विश्वैकसारं रघुवंश हारम् ।
  गम्भीरनादं जितसर्व वादं, श्रीरामचन्द्रं

खले कृतान्तं स्वजने विनीतं सामोपगीतं
मनसाऽप्रतीतम् रागेणगीतं वचनात् अतीतं
श्रीरामचन्द्रं सततं नमामि ।

आदौ राम तपोवनादि गमनं
हत्वा मृगं कांचनं
वैदेही हरणं जटायु मरणं
सुग्रीव सम्भाषणम् ।

बाली निर्दलनं समुद्र तरणं
लंकापुरी दाहनं
पश्चात रावण कुम्भकर्ण हननं
चैतत हि रामायणम् ।

श्रीरामचन्द्र कृपालु भजु मन हरण भवभय दारुणं ।
नवकंज लोचन कंज मुख कर कंज पद कंजारुणं ॥
कंदर्प अगनित अमित छबि नवनील नीरद सुंदरं ।
पट पीत मानहु तडित रुचि शुचि नौमि जनकसुता वरं ॥
भजु दीनबंधु दिनेश दानव दैत्यवंश निकंदनं ।
रघुनंद आनंदकंद कौशलचंद दशरथ नंदनं ॥
सिर मुकुट कुंडल तिलक चारु उदारु अंगविभूषणं ।
आजानुभुज शर चाप धर संग्रामजित खरदूषणं ॥
इति वदति तुलसीदास शंकर शेष मुनि मन रंजनं ।
मम हृदय कंज निवास कुरु कामादि खलदल गंजनं ।
मनु जाहिं राचेउ मिलिहि सो बरु सहज सुन्दर साँवरो ।
करुना निधान सुजान सीलु सनेहु जानत रावरो ॥
एहि भाँति गौरि असीस सुनि सिय सहित हियँ हरषीं अली ।
तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मंदिर चली ॥

ललितापञ्चकम्

प्रातः स्मरामि ललितावदनारविन्दं
बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वलभालदेशम् ॥१॥
प्रातर्भजामि ललिताभुजकल्पवल्लीं
रक्ताङ्गुलीयलसदङ्गुलिपल्लवाढ्याम् ।
माणिक्यहेमवलयाङ्गदशोभमानां
पुण्ड्रेक्षुचापकुसुमेषुसृणीदधानाम् ॥२॥
प्रातर्नमामि ललिताचरणारविन्दं
भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं
पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम् ॥३॥
प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थितिहेतुभूताम्
विद्येश्वरीं निगमवाङ्मनसातिदूराम् ॥४॥

IMP. NOTES

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशाम्भवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥५॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ।

भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानी ॥१॥

भवाब्धावपारे महादुःखभीरुः
पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं
गतिस्त्वं..... ॥२॥

न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न च न्यासयोगं
गतिस्त्वं..... IMP. NOTES ॥३॥

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर्
गतिस्त्वं॰ - - - - - ॥४॥

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं
गतिस्त्वं॰ - - - ॥५॥

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित ।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं - - - ॥६॥

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं - - - - ॥७॥

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः
विपत्तौ प्रविष्टः प्रणष्टः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥८॥

IMP. NOTES

श्रीभगवतीस्तोत्रम्

जय भगवति देवि नमो वरदे
जय पापविनाशिनि बहुफलदे ।
जय शुम्भनिशुम्भकपालधरे
प्रणमामि तु देवि नरार्तिहरे ॥१॥

जय चन्द्रदिवाकरनेत्रधरे, जय पावकभूषितवक्त्रवरे ।
जय भैरवदेहनिलीनपरे जय अन्धकदैत्यविशोषकरे ॥२॥

जय महिषविमर्दिनि शूलकरे जय लोकसमस्तकपापहरे ।
जय देवि पितामहविष्णुनते जय भास्करशक्रशिरोऽवनते ॥३॥

जय षण्मुखसायुधईशनुते जय सागरगामिनि शम्भुनुते ।
जय दुःखदरिद्रविनाशकरे जय पुत्रकलत्रविवृद्धिकरे ॥४॥

जय देवि समस्तशरीरधरे जय नाकविदर्शिनि दुःखहरे ।
जय व्याधिविनाशिनि मोक्षकरे जय वाञ्छितदायिनि सिद्धिवरे ॥५॥

ॐ प्रीता भगवती सदा

IMP. NOTES

'03

24 FRI

महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१॥

नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥२॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥३॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥४॥

आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥५॥

स्थूलसुक्ष्ममहारौद्रे महाशक्तिमहोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥६॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मात महालक्ष्मि नमोऽस्तु ते ॥७॥

श्वेताम्बरधरे देवि नानालङ्कारभूषिते ।
जगत्स्थिते जगन्मातमहालक्ष्मि नमोऽस्तते ॥८॥

महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥
एककाले पठेन्नित्यं महापापविनाशनम ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१०॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम ।
महालक्ष्मी भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

IMP. NOTES

गौरीस्तुति

ॐ लीलारब्द-स्थापित लुप्ताखिल लोकां
लोकातीतैः योगिभिर् अन्तर हृदि मृग्याम् ।
बालादित्य श्रेणि समान द्युति पुंजां
गौरीम अम्बाम अम्बुरुहाक्षीम अहम ईड्ये ॥

आशा पाश क्लेश विनाशं विदधानां
पादाम्भोज ध्यान पराणां पुरुषाणाम् ।
ईशीम ईशाङ्गार्ध हरां तां तनुमध्यां
गौरीम अम्बाम् ... ॥

प्रत्याहार ध्यान समाधि स्थितिभाजां
नित्यं चित्ते निर्वृत्तिकाष्ठां कलयन्तीम ।
सत्य ज्ञाना नन्दमयीं तां तडित आभां
गौरीम अम्बाम् ... ॥

चन्द्रापीडा नन्दितमन्द स्मितवक्त्रां
चन्द्रपीडा लंकृत लोला लकभाराम ।
इन्द्रोपेन्द्रा द्यर्चित पादाम्बुजयुग्मां
गौरीम अम्बाम् ... ॥

IMP. NOTES

नानाकारैः शक्ति-कदम्बै र्भुवनानि
व्याप्त स्वैरं क्रीडति यासौ स्वयमेका ।
कल्याणीं तां कल्पलताम-आनतिभाजां
गौरीम अम्बाम ... ॥

मूलाधारात उत्थित वन्तीं विधिरन्ध्रं
सौरं चान्द्रं धाम विहाय ज्वलिताङ्गीम् ।
स्थूलां सूक्ष्मां सूक्ष्मतरां ताम् अभिवन्द्यां
गौरीम अम्बाम --- ॥

आदि क्षान्ताम अक्षर मूर्त्या विलसन्तीं
भूते भूते भूत कदम्बं प्रसवित्रीम् ।
शब्द ब्रह्मा नन्द मयीं ताम अभिरामां
गौरीम अम्बाम् --- ॥

यस्या कुक्षौ लीनम् अखण्डं जगत अण्डं
भूयो भूयः प्रादुर अभूत अक्षतमेव ।
भर्त्रा सार्धं तां स्फटिकाद्रौ विहरन्तीम
गौरीम अम्बाम् ॥

यस्याम एतत्प्रोतम् अशेषं मणिमाला
सूत्रे यत वत क्वापि चरं चाप्यचरं च ।
ताम् अध्यात्म ज्ञानपदव्या गमनीयां
गौरीम अम्बाम् ... ॥

नित्यः सत्यो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च ।
विश्वत्राण क्रीडन शीलां शिवपत्नीं
गौरीम अम्बाम् --- ॥

प्रातः काले भावविशुद्धिं विदधानो
भक्त्या नित्यं जल्पति गौरीदशकं यः ।
वाचां सिद्धिं सम्पतिम् उच्चैः शिवभक्तिं
तस्या वश्यं पर्वत पुत्री विदधाति ॥

गौरीम अम्बाम् अम्बुरुहाक्षीम् ~~अहम~~
अहम इके इडये
गौरीम अम्बाम् अम्बुरूहाक्षीम अहम इडये

दुर्गास्तुति

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके
विश्वरूपे । नमस्ते जगद्वन्द्य पादारविन्दे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनि
ज्ञानरूपे । नमस्ते नमस्ते सदानन्दरूपे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य
बद्धस्य जन्तोः । त्वमेका गतिर्देवि निस्तारकर्त्री,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

अरण्ये रणे दारुणे शत्रुमध्ये ऽनले सागरे प्रान्तरे राजगेहे ।
त्वमेका गतिर्देवि निस्तारनौका नमस्ते जगत्तारिणि
त्राहि दुर्गे ॥

अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां
देहभाजाम । त्वमेका गतिर्देवि निस्तार हेतुः
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

नमश्चण्डिके चण्डदुर्दण्डलीला समुत्खण्डिताखण्डिता-
शेषशत्रो । त्वमेका गतिर्देवि निस्तारबीजं, नमस्ते
जगत्तारिणि त्राहि दुर्गे ॥

त्वमेवाघभावाधृतासत्यवादीर्न जाताजितक्रोधनात्
क्रोधनिष्ठा । इडा पिङ्गला त्वं सुषुम्णा च नाडी,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

IMP. NOTES

नमो देवि दुर्गे शिवे भीमनादे सरस्वत्यरुन्धत्य-
मोघस्वरूपे । विभूतिः शची कालरात्रि सतिः त्वं,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥

रोगान अशेषान अपहंसि तुष्टा
रुष्टा तु कामान सकलान अभीष्टान ।
त्वाम आश्रितानां न विपत् नराणाम्
त्वाम आश्रिता ह्याश्रियतां प्रयान्ति ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः
श्रद्धा सतां कुलजन प्र भवस्य लज्जा,
तां त्वां नताःस्म परिपालय देवि विश्वम् ॥

सर्व मंगल मंगल्ये शिवे सर्वार्थ साधिके
शरण्ये त्रयम्बके गौरि नारायणि नमोऽस्तुते ।

शरणागत दीनार्त परित्राण परायणे
सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तुते ।

सर्वाबाधा विनिर्मुक्तो धन धान्य समन्विताः
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ।

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते
भयेभ्यः त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ।

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी
एवमेव त्वयाकार्यमस्मद्वैरिविनाशनम् ।

देहि सौभाग्यम आरोग्यं देहि मे परमं सुखम्
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।

IMP. NOTES

देव्या यया ततमिदं जगदात्म शक्त्या
निश्शेष देव गण शक्तिसमूह मूर्त्या।
तामम्बिकाम खिलदेव महर्षि पूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

स्तुता सुरैः पूर्वमभीष्ट संश्रया
तथा सुरेन्द्रेण दिनेषु सेविता
करोतु सा नः शुभहेतुरीश्वरी
शु भानि भद्राण्यभिहन्तु चापदः ॥

जयन्ती मङ्गला काली भद्रकाली कपालिनी
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥

दुर्गे स्मृता हरसि भीतिम शेषजन्तोः
स्वस्थै स्मृता मतिम अतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकार करणाय सदाऽऽर्द्रचित्ता ॥


शूलेन पाहि नो देवि पाहि खडगेन चाम्बिके
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च॥

त्वं वैष्णवी शक्तिर अनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहित देवि समस्तमेतत
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥

अन्पूर्णे सदापूर्णे शंकर प्राण वल्लभे
ज्ञान वैराग्य सिद्धयर्थं भिक्षां देहि च
पार्वति

NOTES

प्रणातानां प्रसीद त्वं देवि विश्वार्तिहारिणि
त्रैलोक्य वासिनाम् ईड्यं लोकानां
वरदा भव ॥



क्षमा स्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा: ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वतनुसरणं क्लेशहरणम् ॥

विधेर अज्ञानेन द्रविणे विरहेणा लसतया
विधेयाशक्यत्वात्-त चरणयो या च्युतिरभूत् ।
तदेतत क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

पृथिव्यां पुत्रास्ते जननि बहव: सन्ति सरला:
परं तेषां मध्ये विरलतरलोऽहं तव सुत: ।
मदीयोऽयं त्याग: समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

~~तथापि त्वं स्नेहं मयि निरुपमं~~
परित्यक्ता देवा विविधविधसेवा कुलतया
मया पञ्चाशीतेर धिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥

IMP. NOTES

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकै: ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जन: को जानीते जननि जपनीयं जपविधौ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणि ग्रहण परिपाटी फलमिदम् ॥

न मोक्षस्याकाङ्क्षा भवविभव वाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥

निराधितासि विधिना विविधोपचारैः
किं रूक्षाचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपाम उचितम् अम्ब परं तवैव ॥

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति ॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराध परंपरा वृतं न हि माता समुपेक्षते सुतम ॥

मम मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महदेवि यथायोग्यं तथा कुरु ॥

IMP. NOTES

शांतिपाठ

भद्रंकर्णेभिः श्रृणुयाम देवाः
भद्रं पश्येमाक्षिभिर्यजत्राः ।
स्थिरैरंगै तष्टुवांसस्तनूभि र्व्यशेम देवहित यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नः तार्क्ष्यो अरिष्टनेमी
स्वस्ति न बृहस्पतिः दधातु ॥
स्वस्तिप्रजाभ्यः परिपालयन्तां
न्यायेन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्तः सुखिनो भवन्तु ॥
काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोयं क्षोभरहिता ब्रह्मणाः सन्तु निर्भयाः ॥
दुर्जनः सज्जनो भूयात सज्जनः शान्तिम आप्नुयात ।
शान्तिम उच्येत बन्धेभ्यो मुक्ताश्चान्यान विमोचयेत ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया :

सर्वे भद्राणि पश्यन्तु मा कश्चिद दुःखमाग्भवेत ॥

राजस्वस्ति प्रजास्वस्ति देशस्वस्ति तथैव च ।

यजमान गृहे स्वस्ति स्वस्ति गोब्रह्मणेषु च ॥

विधहि देवि कल्याणं विधेहि परमां श्रियं

रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा

शन्नो इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः

नमो ब्रह्मणे नमो वायवे नमस्ते वायो

त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं

ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं

वदिष्यामि तन्मामवतु तद्वक्तारमवतु

अवतु मामवतु वक्तारं, शान्तिः शान्तिः शान्तिः ॥

सह नौ अवतु सह नौ भुनक्तु सहवीर्यं करवावहै

तेजस्विनाम अधीतमस्तु माद्विषावहै शान्तिःशान्तिःशान्तिः ॥

18
TUE

IMP. NOTES

MAR 2003	S	S	M	T	W	T	F	S	S	M	T	W	T	F	S	S	M	T	W	T	F	S	S	M	T	W	T	F	S	S
	1	2	3	4	5	6	7	8	9	10	11	12	13	14	15	16	17	18	19	20	21	22	23	24	25	26	27	28	29	30

[illegible]

[illegible]

[illegible]

ॐ नमः श्चिच्छक्तयै ॥

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवित्तुं
न चेदेवं देवो न खलु कुशलः स्पन्दितु-मपि । (1)
अतस्त्वा-माराध्यां हरि-हर-विरिञ्चादिभि-रपि
प्रणन्तुं स्तोतुं वा कथ-मकृतपुण्यः प्रभवति ॥ (1)
तनीयांसं पांसुं तव चरण-पङ्केरूह-भवं
विरिंचिः संचिन्वन् विरचयति लोका-नविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुदयैनं भजति भसितोद्धूलन-विधिम् ॥ (2)
अविद्याना-मन्त-स्तिमिर-मिहिर-द्वीप-नगरी
जडानां चैतन्य-स्तबक-मकरन्द-स्रुतिझरी ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपु-वराहस्य भवति ॥ (3)

त्वदन्यः पाणिभ्या- मभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटित- वराभीत्यभिनया ।
भयात् त्रातुं दातुं फलमपि च वांछासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥ (4)

हरिस्त्वामाराध्य प्रणत-जन-सौभाग्य-जननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभ-मनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयन-लेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ (5)

धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखाः
वसन्तः सामन्तो मलयमरु-दायोधन - रथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपां
अपांगात्ते लब्ध्वा जगदिद- मनङ्गो विजयते ॥ (6)

क्वणत्कांची- दामा करिकलभ कुंभ-स्तन-नता
परिक्षीणा मध्ये परिणत- शरच्चन्द्र- वदना ।
धनु- र्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्ता-दास्तां नः पुरमथितु - राहो- पुरुषिका ॥ (7)

सुधासिन्धो-र्मध्ये सुरविटपि-वाटी-परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणि-गृहे ।
शिवाकारे मञ्चे परमशिव-पर्यङ्क-निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्द-लहरीम् ॥ (८)

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुत-माकाश-मुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ (९)

सुधाधारासारै-श्चरणयुगलान्त-र्विगलितैः
प्रपंचं सिञ्चन्ती पुनरपि रसाम्नाय-महसः ।
अवाप्य स्वां भूमिं भुजग-निभ-मध्युष्ट-वलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ (१०)

चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः ।
चतुश्चत्वारिंशद्-वसुदल-कलाश्र-त्रिवलय-
त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः ॥ (११)

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्च-प्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभि-र्दुष्प्रापामपि गिरिश-सायुज्य-पदवीम् ॥ (12)

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापांगालोके पतित-मनुधावन्ति शतशः ।
गलद्वेणीबन्धाः कुचकलश विस्रस्त-सिचया
हटात्- त्रुटयत्काञ्च्यो विगलित-दुकूला युवतयः ॥ (13)

क्षितौ षट्पञ्चाशद्- द्विसमधिक-पञ्चाश-दुदके
हुताशे द्वाषष्टि-श्चतुरधिक-पञ्चाश-दनिले ।
दिवि द्विःषट्त्रिंशन्- मनसि च चतुःषष्टिरिति ये
मयूखा-स्तेषा-मप्युपरि तव पादांबुज-युगम् ॥ (14)

शरज्ज्योत्स्ना-शुद्धां शशियुतजटाजूट-मकुटां
वर त्रास त्राण-स्फटिकघुटिका-पुस्तक-कराम् ।
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते
मधु क्षीर-द्राक्षा-मधुरिम-धुरिणाः फणितयः ॥ (15)

कवीन्द्राणां चेतः कमलवन-बालातप-रुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् ।
विरिञ्चि-प्रेयस्या-स्तरुणतर-शृङ्गारलहरी-
गभीराभि-र्वाग्भिर्विदधति सतां रञ्जनममी ॥ (16)
सवित्रीभि-र्वाचां शशि-मणि-शिला-भङ्ग-रुचिभि-
र्वशिन्याद्याभि-स्त्वां सहजननि संचिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गिरुचिभि-
र्वचोभि-र्वाग्देवी-वदन कमलामोद-मधुरैः ॥ (17)
तनुच्छायाभिस्ते तरून-तरणि-श्रीसरणिभि-
र्दिवं सर्वा-मुर्वी-मरुणिमनि मग्ना स्मरति यः ।
भवन्त्यस्य त्रस्य-द्वनहरिण-शालीन-नयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाण-गणिकाः ॥ (18)
मुखं बिन्दुं कृत्वा कुचयुगमध-स्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम् ।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दु-स्तनयुगाम् ॥ (19)

किरन्ती-मङ्गेभ्यः किरण-निकुरुम्बामृतरसं
हृदि त्वा-माधत्ते हिमकरशिला-मूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधार-सिरया ॥ (20)
तटिल्लेखा-तन्वीं तपन शशि वैश्वानर-मयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलाम् ।
महापद्माटव्यां मृदित मलमायेन मनसा
महान्तः पश्यन्तो दधति परमह्लाद-लहरीम् ॥ (21)
भवानि त्वं दासे मयि वितर दृष्टिं सकरूणां
इति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्य-पदवीं
मुकुन्द-ब्रह्मेन्द्र-स्फुट मकुट नीराजितपदाम् ॥ (22)
त्वया हृत्वा वामं वपु-रपरितृप्तेन मनसा
शरीरार्धं शंभो-रपरमपि शङ्के हृतमभूत् ।
यदेतत् त्वद्रूपं सकलमरूणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिल-शशिचूडालमकुटम् ॥ (23)

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्व-न्नेतत् स्वमपि वपु-रीश-स्तिरयति ।
सदा पूर्वः सर्वं तदिद-मनुगृह्णाति च शिव-
स्तवाज्ञा-मालम्ब्य क्षणचलितयो-र्भ्रूलतिकयोः ॥ (24)

त्रयाणां देवानां त्रिगुण-जनितानां तव शिवे
भवेत् पूजा पूजा तव चरणयो-र्या विरचिता ।
तथा हि त्वत्पादोद्वहन-मणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलित-करोत्तंस-मकुटाः ॥ (25)

विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री विततिरपि संमीलित-दृशा
महासंहारेऽस्मिन् विहरति सति त्वत्पति-रसौ ॥ (26)

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्य-क्रमण-मशनाद्याहुति-विधिः ।
प्रणामः संवेशः सुखमखिल-मात्मार्पण-दृशा
सपर्या-पर्याय-स्तव भवतु यन्मे विलसितम् ॥ (27)

सुधामप्यास्वाद्य प्रति-भय-जरामृत्यु-हरिणीं
विपद्यन्ते विश्वे विधि-शतमखाद्या दिविषदः ।
करालं यत्क्ष्वेलं कबलितवतः कालकलना
न शम्भोस्तन्मूलं तव जननि ताटङ्क महिमा ॥ (28)

किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जंभारि-मकुटम् ।
प्रणम्रेष्वेतेषु प्रसभ-मुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्ति-र्विजयते ॥ (29)

स्वदेहोद्भूताभि र्घृणिभि-रणिमाद्याभि-रभितो
निषेव्ये नित्ये त्वा-महमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयन समृद्धिं तृणयतो
महासंवर्ताग्नि- र्विरचयति नीराजन-विधिम् ॥ (30)

चतुःषष्टया तन्त्रैः सकल मतिसन्धाय भुवनं
स्थितस्तत्तत्-सिद्धि-प्रसव परतन्त्रैः पशुपतिः ।
पुनस्त्व-न्निर्बन्धा-दखिल-पुरुषार्थैक-घटना-
स्वतन्त्रं ते तन्त्रं क्षितितल-मवातीतर-दिदम् ॥ (31)

शिवः शक्तिः कामः क्षिति-रथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परा-मार-हरयः ।
अमी हृल्लेखाभि-स्तिसृभि-रवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ (32)

स्मरं योनिं लक्ष्मीं त्रितय-मदि-मादौ तव मनो-
र्निधायैके नित्ये निरवधि-महाभोग-रसिकाः ।
भजन्ति त्वां चिन्तामणि-गुणनिबद्धाक्ष-वलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृत-धाराहुति-शतैः ॥ (33)

शरीरं त्वं शंभोः शशि-मिहिर-वक्षोरुह-युगं
तवात्मानं मन्ये भगवति नवात्मान-मनघम् ।
अतः शेष शेषीत्यय-मुभय-साधारणतया
स्थितः संबन्धो वां समरस परानन्द-परयोः ॥ (34)

मनस्त्वं व्योम त्वं मरूदसि मरूत्सारथि-रसि
त्वमाप-स्त्वं भूमि-स्त्वयि परिणतायां न हि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्व-वपुषा
चिदानन्दाकारं शिवयुवति-भावेन बिभृषे ॥ (35)

तवाज्ञाचक्रस्थं तपन शशि कोटि-द्युतिधरं
परं शंभुं वन्दे परिमिलत- पार्श्वं परचिता ।
यमाराध्यन् भक्त्या रवि शशि शुचीना-मविषये
निरालोकेऽलोके निवसति हि भालोक-भुवने ॥ (36)

विशुद्धौ ते शुद्धस्फटिक विशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमान- व्यवसिताम् ।
ययोः कान्त्या यान्त्याः शशिकिरण-सारूप्यसरणेः
विधूतान्त- र्ध्वान्ता विलसति चकोरीव जगती ॥ (37)

समुन्मीलत् संवित्कमल- मकरन्दैक - रसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम् ।
यदालापा- दष्टादश- गुणित- विद्यापरिणति-
र्यदादत्ते दोषद गुण- मखिल - मद्भ्यः पय इव ॥ (38)

तव स्वाधिष्ठाने हुतवह- मधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान् दहति महति क्रोध- कलिते
दयार्द्रा या दृष्टिः शिशिर- मुपचारं रचयति ॥ (39)

तटित्वन्तं शक्त्या तिमिर- परिपन्थि-स्फुरणया
स्फुर- न्नानारत्नाभरण परिणद्धेन्द्र- धनुषम् ।
तव श्यामं मेघं कमपि मणिपूरैक- शरणं
निषेवे वर्षन्तं हरमिहिर-तप्तं त्रिभुवनम् ॥ (40)

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरस महाताण्डव- नटम् ।
उभाभ्या- मेताभ्यां- मुदय- विधि- मुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमत् जगदिदम् ॥ (41)

गतै- र्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
स नीडेयच्छाया- च्छुरण- शबलं चन्द्र-शकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम् ॥ (42)

धुनोतु ध्वान्तं न स्तुलित- दलितेन्दीवर-वनं
घनस्निग्ध- श्लक्ष्णं चिकुर निकुरुम्बं तव शिवे ।
यदीयं सौरभ्यं सहज-मुपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये वलमथन- वाटी-विटपिनाम् ॥ (43)

तनोतु क्षेमं न-स्तव वदनसौन्दर्यलहरी
परीवाहस्रोतः-सरणिरिव सीमन्तसरणिः ।
वहन्ती सिन्दूरं प्रबलकबरी-भार-तिमिर-
द्विषां वृन्दै-र्बन्दीकृतमिव नवीनार्क-किरणम् ॥ (44)

अरालै स्वाभान्या-दलिकलभ-सश्रीभि-रलकैः
परीतं ते वक्त्रं परिहसति पङ्केरूहरूचिम् ।
दरस्मेरे यस्मिन् दशनरूचि-किञ्जल्क-रूचिरे
सुघन्धौ माद्यन्ति-स्मरदहन-चक्षु-र्मधुलिहः ॥ (45)

ललाटं लावण्य-द्युति-विमल-माभाति तव यत्
द्वितीयं तन्मन्ये मकुटघटितं चन्द्रशकलम् ।
विपर्यास-न्यासा-दुभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राका-हिमकरः ॥ (46)

भ्रुवौ भुग्ने किंचिद् भुवन-भय भङ्ग-व्यसनिनि
त्वदीये नेत्राभ्यां मधुकर-रुचिभ्यां धृतगुणम् ।
धनु-र्मन्ये सव्येतरकर-गृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तर-मुमे ॥ (47)

अहः सूते सव्यं तव नयन मर्कात्मकतया ।
त्रियामां वामं ते सृजति रजनीनायकतया
तृतीया ते दृष्टि र्दरदलित हेमाम्बुज रुचिः
समाधत्ते सन्ध्यां दिवस निशयो-रन्तरचरीम् ॥ (48)

विशाला कल्याणी स्फुटरुचि- रयोध्या कुवलयैः
कृपाधाराधारा किमपि मधुराऽऽभोगवतिका ।
अवन्ती दृष्टिस्ते बहुनगर- विस्तार विजया
ध्रुवं तत्तन्नाम व्यवहरण- योग्या विजयते ॥ (49)

कवीनां सन्दर्भ-स्तबक मकरन्दैक रसिकं
कटाक्ष व्याक्षेप भ्रमरकलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वाद-तरलौ
असूया संसर्गा दलिकनयनं किञ्चिदरुणम ॥ (50)

शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिशचरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुह- सौभाग्य जननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ (51)

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्तप्रशम-रस विद्रावण फले ।
इमे नेत्रे गोत्राधरपति कुलोत्तंस कलिके
तवाकर्णाकृष्ट-स्मरशर-विलासं कलयतः ॥ (52)

विभक्त-त्रैवर्ण्यं व्यतिकरित-लीलाञ्जनतया
विभाति त्वन्नेत्र-त्रितय मिद मीशानदयिते ।
पुनः स्रष्टुं देवान् द्रुहिण हरिरुद्रानुपरतान्
रजः सत्त्वं बिभ्रत् तम इति गुनानां त्रयमिव ॥ (53)

पवित्रीकर्तुं नः पशुपति-पराधीन हृदये
दयामित्रै-र्नेत्रै-ररुण धवलश्याम-रुचिभिः ।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थाना-मुपनयसि संभेद-मनघम् ॥ (54)

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधर-राजन्यतनये ।
त्वदुन्मेषाज्जातं जगदिद मशेषं प्रलयतः
परित्रातुं शङ्के परिहृत निमेषास्तव दृशः ॥ (55)

तवापर्णे कर्णे जपनयन- पैशुन्य- चकिता
निलीयन्ते तोये नियत- मनिमेषाः शफरिकाः ।
इयं च श्री- र्बद्धच्छद- पुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ (56)

दृशा द्राघीयस्या दरदलित- नीलोत्पल- रुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर- निपातो हिमकरः ॥ (57)

अरालं ते पालीयुगल- मगराजन्यतनये
न केषा माधत्ते कुसुमशर - कोदण्ड - कुतुकम् ।
तिरश्चीनो यत्र श्रवणपथ- मुल्लङ्घ्य विलसन्
अपांग- व्यासंगो दिशति शरसन्धान धिषणाम् ॥ (58)

स्फुरद्गण्डाभोग - प्रतिफलित- ताटङ्कयुगलं
चतुश्चक्रं मन्ये मुखमिदं मन्मथरथम् ।
यमारुह्य द्रुह्य- त्यवनिरथ- मर्केन्दुचरणं
महावीरो मारः ~~प्रमथपतये~~ सज्जितवते ॥ (59)

सरस्वत्याः सूक्ती-रमृतलहरी कौशलहरी
पिबन्त्याः शर्वाणि श्रवण चुलुकाभ्या-मविरलम् ।
चमत्कार-श्लाघाचलित- शिरसः कुण्डलगणो
झणत्कारैस्तारैः प्रतिवचन-माचष्ट इव ते ॥(60)

असौ नासावंश-स्तुहिनगिरिवंश-ध्वजपटि
त्वदीयो नेदीयः फलतु फल-मस्माकमुचितम् ।
वहत्यन्तर्मुक्ताः शशिरकर-निश्वास- गलितं
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ॥ (61)

प्रकृत्याऽऽरक्ताया-स्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।
न बिंबं तद्बिंब प्रतिफलन रागा दरूणितं
तुलामध्यारोढुं कथमिव न लज्जेत कलया ॥ (62)

स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिवतां
चकोराणा-मासी- दतिरसतया चञ्चुजडिमा ।
अतस्ते शीतांशो-रमृतलहरी-माम्लरुचयः
पिबन्ति स्वच्छन्दं निशि निशि भृशं काञ्जिकधिया ॥ (63)

अविश्रान्तं पत्यु-गुणगण-कथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिकदृष-दच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥ (64)

रणे जित्वा दैत्या-नपहृत-शिरस्त्रैः कविभिः
निवृत्तै-श्चण्डांश-त्रिपुरहर-निर्माल्य-विमुखैः ।
विशाखेन्द्रोपेन्द्रैः शशिविशद-कपूरशकला
विलीयन्ते मातस्तव वदनताम्बूल-कबलाः ॥ (65)

विपञ्च्या गायन्तीं विविध-मपदानं पुररिपो-
स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने ।
तदीयै-र्माधुर्यै-रपलपितं-तन्त्रीकलरवां
निजां वीनां वाणी निचुलयति चोलेन निभृतम् ॥ 66

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
करग्राह्यं शंभोर्मुखमुकुरवृन्तं गिरिसुते
कथंकारं ब्रूम-स्तव चुबुक-मौपम्यरहितम् ॥ 67

भुजाश्लेषान्नित्यं पुरदमयितुः कण्ठकवती
तव ग्रीवा धत्ते मुखकमलनाल-श्रियमियम् ।
स्वतः श्वेता कालागरु-बहुल जम्बालमलिना
मृणाली लालित्यं वहति यदधो हारलतिका ॥ 68

गलेरेखास्तिस्रो गति-गमक गीतैक-निपुणे
विवाह-व्यानद्ध प्रगुणगुण-संख्या प्रतिभुवः ।
विराजन्ते नानाविध मधुर रागाकर-भुवां
त्रयाणां ग्रामाणां स्थिति-नियम-सीमान इव ते ॥ 69

मृणाली-मृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रथम मथना-दन्धकरिपोः
चतुर्णां शीर्षाणां सम-मभयहस्तार्पण-धिया ॥ 70

नखाना-मुद्योतै-र्नवनलिनरागं विहसतां
कराणां ते कान्तिं कथय कथयामः कथमुमे ।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मी-चरणतल-लाक्षारस-चणम् ॥ 71

समं देवि स्कन्द-~~द्विपवद~~ द्विपवदन पीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुत मुखम् ।
यदालोक्याशङ्काकुलित हृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झडिति ॥ 72

अमू ते वक्षोजा वमृतरस-माणिक्य कुतुपौ
न संदेहस्पन्दो नगपति पताके मनसि नः ।
पिबन्तौ तौ यस्मा दविदित वधूसङ्ग-रसिकौ
कुमारावद्यापि द्विरदवदन क्रौञ्चदलनौ ॥ 73

वहत्यम्ब स्तम्बेरम-दनुज-कुम्भप्रकृतिभिः
समारब्धां मुक्तामणिभि-रमलां हारलतिकाम् ।
कुचभोगो बिम्बाधर-रुचिभि-रन्तः शबलितां
प्रताप-व्यामिश्रां पुरदमयितुः कीर्तिमिव ते ॥ 74

तव स्तन्यं मन्ये ~~धर~~ धरणिधरकन्ये हृदयतः
पयः पारावारः परिवहति सारस्वतमिव ।
दयावत्या दत्तं द्रमिलशिशु-रास्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता ॥ 75

हरक्रोध-ज्वालावलिभि-रवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः ।
समुत्तस्थौ तस्मा दचलतनये धूमलतिका
जनस्ता जानीते तव जननि रोमावलिरिति ॥ 76

यदेतत्कालिन्दी तनुतर तरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज्जननि तव यद्भाति सुधियाम् ।
विमर्दा-दन्योन्यं कुचकलशयो-रन्तरगतं
तनूभूतम व्योम प्रविशदिव नाभिं कुहरिणीम् ॥ 77

स्थिरो गङ्गावर्तः स्तनमुकुल-रोमावलि-लता
कलावालं कुण्डं कुसुमशर तेजो हुतभुजः ।
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धे-र्गिरिशनयनानां विजयते ॥ 78

निसर्ग क्षीणस्य स्तनतट भरेन क्लमजुषो
नमन्मूर्ते नारीतिलक शनकै-स्त्रुटयत इव ।
चिरं ते मध्यस्य त्रुटित तटिनी तीर तरुणा
समावस्था स्थेम्नो भवतु कुशलं शैलतनये ॥ 79

कुचौ सद्यः स्विद्य-त्तटघटित-कूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता ।
तव त्रातुं भङ्गादलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवलीवल्लिभिरिव ॥ 80

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजा
न्नितम्बा - दाच्छिद्य त्वयि हरणरूपेण निदधे ।
अतस्ते विस्तीर्णो गुरुरय मशेषां वसुमतीं
नितम्ब प्राग्भारः स्थगयति लघुत्वं नयति च ॥ 81

करीन्द्राणां शुण्डान् कनककदली काण्डपटलीं
उभाभ्यामूरुभ्या - मुभयमपि निर्जित्य भवती ।
सवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुध करिकुंभ द्वयमसि ॥ 82

पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली-
नखाग्रच्छद्मानः सुर-मुकुट शाणैक निशिताः ॥ 83

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपति जटाजूट-तटिनी
ययो - र्लाक्षा लक्ष्मी ररुण हरिचूडामणि-रुचिः ॥ 84

नमोवाकं ब्रूमो नयन रमणीयाय पदयोः
तवास्मै द्वन्द्वाय स्फुट रुचिरसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूना - मीशानः प्रमदवन कङ्केलितरवे ॥ 85

मृषा कृत्वा गोत्रस्खलन - मथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते ।
चिरादन्तःशल्यं दहनकृत मुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलित मीशान रिपुणा ॥ 86

हिमानी हन्तव्यं हिमगिरि- निवासैक चतुरौ
निशायां निद्राणं निशि चरमभागे च विशदौ ।
वरं लक्ष्मीपात्रं श्रिय मतिसृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयत-श्चित्रमिह किम् ॥ 87

पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिन कमठी कर्पर तुलाम् ।
कथं वा बाहुभ्या- मुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥ 88

नखै र्नाकिस्त्रीणां करकमल संकोच शशिभि
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वःस्थेभ्यः किसलय-कराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिश- मह्नाय ददतौ ॥ 89

ददाने दीनेभ्यः श्रियमनिश-माशानुसदृशीं
अमन्दं सौन्दर्य प्रकर मकरन्दं विकिरति ।
तवास्मिन् मन्दार स्तबक सुभगे यातु चरणे
निमज्जन् मज्जीवः करणचरणः षट्चरणताम् ॥ 90

पदन्यास क्रीडा परिचय-मिवारब्धु मनसः
स्खलन्तस्ते खेलं भवनकलहंसा न जहति ।
अतस्तेषां शिक्षां सुभगमणि मञ्जीर-रणित-
च्छलादाचक्षाणं चरणकमलं चारुचरिते ॥ 91

गतास्ते मञ्चत्वं द्रुहिण-हरि रुद्रेश्वर भृतः
शिवः स्वच्छ च्छाया-घटित कपट प्रच्छदपटः ।
त्वदीयानां भासां प्रतिफलन रागारुणतया
शरीरी शृङ्गारो रस इव दृशां दोग्धि कुतुकम् ॥ 92

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे ।
भृशं तन्वी मध्ये पृथु-रुरसिजारोह-विषये
जगत्त्रातुं-शंभोर्जयति करुणा काचिदरुणा ॥ 93

कलङ्कः कस्तूरी रजनिकर-बिम्बं जलमयं
कलाभिः कर्पूरै- र्मरकतकरण्डं निबिडितम् ।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते ॥ 94

पुराराते रन्तः पुरमसि तत स्त्वच्चरणयोः
सपर्या मर्यादा तरलकलनाना मसुलभा ।
तथा ह्येते नीताः शतमखमुखाः सिद्धिमतुला
तव द्वारोपान्त - स्थितिभि - र्णिमाद्याभि-रमरा ॥ 95

कलत्रं वैधात्रं कतिकति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्वा तव सतिसतीना-~~धाम~~ मचरमे ।
कुचाभ्या - मासङ्गः कुरवक तरो-रप्यसुलभः ॥ 96

गिरामाहु र्देवीं द्रुहिणगृहिणी - मागमविदो
हरेः पत्नीं पद्मां हरसहचरीं मद्रितनयाम् ।
तुरीया कापि त्वं दुरधिगम - निस्सीम - महिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि ॥ 97

कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरण निर्णेजन जलम् ।
प्रकृत्या मूकानामपि च कविता कारणतया
कदा धत्ते वाणीमुखकमल - ताम्बूल रसताम् ॥ 98

सरस्वत्या लक्ष्म्या विधि-हरि-सपत्नो विहरते
रतेः पतिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं ~~पतिव्रत्यं~~ जीवन्नेव क्षपित पशुपाश-व्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्भजनवान् ॥ 99


प्रदीप ज्वालाभि र्दिवसकर नीराजनविधिः
सुधासूते-श्चन्द्रोपल-जललवै-रर्घ्यरचना ।
स्वकीयैरम्भोभिः सलिल निधि सौहित्यकरणं
त्वदीयाभि र्वाग्भि-स्तव जननि वाचां स्तुतिरियम ॥ 100

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि
नैत्च्छठत्वं मम भावयथाः क्षुधातृषार्ता जननी स्मरन्ति ॥
जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतत ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि
एवं ज्ञात्वा महादेवि यथा योग्यं तथ कुरु

14 TUESDAY ✢ OCTOBER

1997



OCTOBER 1997

WE	TH	FR	SA	SU	MO	TU	WE	TH	FR	SA	SU	MO	TU	WE	TH
01	02	03	04	**05**	06	07	08	09	10	11	**12**	13	14	15	16

FR	SA	SU	MO	TU	WE	TH	FR	SA	SU	MO	TU	WE	TH	FR	SA
17	18	**19**	20	21	22	23	24	25	**26**	27	28	29	30	31	✧

महामायै नमः

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनै
प्रजानामीशानस्त्रिपुरमथनः पञ्चभिरपि ।
न षड्भिः सेनानीर्दशशतमुखैरप्यहिपति
स्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥ 1

घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदै-
र्विशिष्यानाख्येयो भवति रसनामात्रविषयः ।
तथा ते सौन्दर्यं परमशिवदृङ्मात्रविषयः
कथङ्कारं ब्रूमः सकलनिगमागोचरगुणे ॥ 2

मुखे ते ताम्बूलं नयनयुगले कज्जलकला
ललाटे काश्मीरं विलसति गले मौक्तिकलता ।
स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी
भजामि त्वां गौरीं नगपतिकिशोरीमविरतम् ॥ 3

विराजन्मन्दारद्रुमकुसुमहारस्तनतटी
नदद्वीणानादश्रवणविलसत्कुण्डलगुणा ॥ 4

नताङ्गी मातङ्गीरुचिरगतिभङ्गी भगवती
सती शम्भोरम्भोरुहचटुलचक्षुर्विजयते ॥ 4

नवीनार्कभ्राजन्मणिकनकभूषापरिकरैः
वृताङ्गी सारङ्गीरुचिरनयनाङ्गीकृतशिवा ।
तडित्पीता पीताम्बरललितमञ्जीरसुभगा
ममापर्णा पूर्णा निरवधिसुखैरस्तु सुमुखी ॥ 5

हिमाद्रेः संभूता सुललितकरैः पल्लवयुता
सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः ।
कृतस्थाणुस्थाना कुचफलनता सुक्तिसरसा
रुजां हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥ 6

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह
श्रयन्त्यन्ये ~~कतिपयगुणैः सादरमिह~~ वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः
पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम ॥ 7

विधात्री धर्माणां त्वमसि सकलाम्नायजननी
त्वमर्थानां मूलं धनदनमनीयाङ्घ्रिकमले ।

त्वमादिः कामानां जननि कृतकन्दर्पविजये
सतां मुक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥ 8
प्रभूता भक्तिस्ते यदपि न ममालोलमनस-
स्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना
पयोदः पानीयं दिशति मधुरं चातकमुखे ।
भृशं शङ्के कैवा विधिभिरनुनीता मम मतिः ॥ 9
कृपापाङ्गालोकं वितर तरसा साधुचरिते
न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते ।
न चेदिष्टं दद्यादनुपदमहो कल्पलतिका
विशेषः सामान्यै कथमितरवल्लीपरिकरै ॥ 10
महान्तं विश्वासं तव चरणपङ्केरुहयुगे
निधायान्यन्नैवाश्रितमिह मया दैवतमुमे ।
तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ 11
अयः स्पर्शे लग्नं सपदि लभते हेमपदवीम्
यथा रथ्यापाथः शुचि भवति गङ्गौघमिलितम् ।

तथा तत्तत्पापैरतिमलिनमन्तर्मम यदि
त्वयि प्रेम्णासक्तं कथमिव न जायेत विमलम् ॥ 12
त्वदन्यस्मादिच्छाविषयफललाभे न नियम-
स्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे ।
इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मन-
स्त्वदासक्तं नक्तं दिवमुचितमीशानि कुरु तत् ॥ 13
स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफल-
त्वदाकारं चञ्चच्छशधरकलासौधशिखरम् ।
मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते
तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥ 14
निवासः कैलासे विधिशतमखाद्याः स्तुतिकरा
कुटुम्बं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः ।
महेशः प्राणेशस्तदवनिधराधीशतनये
न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ 15
वृषो वृद्धो यानं विषमशनमाशा निवसनं
श्मशानं क्रीडाभूर्भुजगनिवहो भूषणविधिः ।

समग्रा सामग्री जगति विदितैव स्मररिपो-

र्यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥ 16

अशेषब्रह्माण्डप्रलयविधिनैसर्गिकमतिः

श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः ।

दधौ कण्ठे हालाहलमखिलभूगोलकृपया

भवत्याः संगत्या फलमिति च कल्याणि कलये ॥ 17

त्वदीयं सौन्दर्यं निरतिशयमालोक्य परया

भियैवासीद्गङ्गा जलमयतनुः शैलतनये ।

तदेतस्यास्तस्माद्वदनकमलं वीक्ष्य कृपया

प्रतिष्ठामातन्वन्निजशिरसिवासेन गिरिशः ॥ 18

विशालश्रीखण्डद्रवमृगमदाकीर्णघुसृण-

प्रसूनव्यामिश्रं भगवति तवाभ्यङ्गसलिलम् ।

समादाय स्रष्टा चलितपदपांसून्निजकरैः

समाधत्ते सृष्टिं विबुधपुरपङ्केरुहदृशाम् ॥ 19

वसन्ते सानन्दे कुसुमितलताभिः परिवृते

स्फुरन्नानापद्मे सरसि कलहंसालिसुभगे ।

[illegible] श्रोणिः खेलन्तीं मलयपवनान्दोलितजले
[illegible] स्मरन्तं तस्य ज्वरजनितपीडापसरति ॥ 20

भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता - न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव - गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 1
भवाब्धावपारे महादुःखभीरुः - पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं - गतिस्त्वं ... ॥ 2
न जानामि दानं न च ध्यानयोगं - न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
~~न जानामि पुण्यं न जानामि तीर्थं~~ ..
न जानामि पूजां न च न्यासयोगं - गतिस्त्वं ... ॥3
न जानामि पुण्यं न जानामि तीर्थं - न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर् - गतिस्त्वं ... ॥ 4
कुकर्मी कुसङ्गी कुबुद्धिः कुदासः - कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं - गतिस्त्वं ... ॥5
प्रजेशं रमेशं महेशं सुरेशं - दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये - गतिस्त्वं ... ॥6
विवादे विषादे प्रमादे प्रवासे - जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि - गतिस्त्वं ... ॥7
अनाथो दरिद्रो जरारोगयुक्तो - महाक्षीणदीनः सदा जाड्यवक्त्रः
विपत्तौ प्रविष्टः प्रनष्टः सदाहं - गतिस्त्वं ... ॥8

श्रीभगवतीस्तोत्रम्

जय भगवति देवि नमो वरदे, जय पापविनाशिनि बहुफलदे ।
जय शुम्भनिशुम्भकपालधरे, प्रणमामि तु देवि नरार्तिहरे ॥

जय चन्द्रदिवाकरनेत्रधरे, जय पावकभुषितवक्त्रवरे ।
जय भैरवदेहनिलीन परे, जय अन्धकदैत्यविशोषकरे ॥

जय महिषविमर्दिनि शूलकरे, जय लोकसमस्तकपापहरे ।
जय देवि पितामहविष्णुनते, जय भास्करशक्रशिरोऽवनते ॥

जय षण्मुखसायुधईशनुते, जय सागरगामिनि शम्भुनुते ।
जय दुःखदरिद्रविनाशकरे, जय पुत्रकलत्रविवृद्धिकरे ॥

जय देवि समस्ताशरीरधरे, जय नाकविदर्शिनि दुःखहरे ।
जय व्याधिविनाशिनि मोक्षकरे, जय वाञ्छितदायिनि सिद्धिवरे ॥

महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते, शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि, सर्वपापहरे देवि महालक्ष्मि ... ॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि, सर्वदुःखहरे देवि महालक्ष्मि ... ॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनी, मन्त्रपूते सदा देवि महालक्ष्मि ... ॥
आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि, योगजे योगसम्भूते महालक्ष्मि ... ॥
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे, महापापहरे देवि महालक्ष्मि ... ॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिनि, परमेशि जगन्मातर्लक्ष्मि ... ॥
श्वेताम्बरधरे देवि नानालङ्कारभूषिते, जगत्स्थिते जगन्मातर्महालक्ष्मि ... ॥
महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः, सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥
एककाले पठेन्नित्यं महापापविनाशनम्, द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्, महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

कापिर लीला

(1)

अज्ञान घटे सिर्य प्रकाश छुक आसवोनुय
ज्ञानप्रकाश छुक आसवोनुय
ॐ श्रीसत्गुरु क्षण क्षण छुम आसर चोनुय

चय छुक ब्रह्मा चय छा विष्णु महेश्वरै
चय विश्वमय छुक अजर अमर अक्षर थरै
बर त्रन गुणन पोदि प्रणाम भवनय म्योनुय ... ॐश्री

चान्यन पादन हन्दि गरदे हृन्दय अंजन
युस लागि नेत्रन देव द्रष्टि तमिस छि बनन्
यथ न कांह जुछान तथ सदा छुक जुछवोनुय ... ॐश्री

दयासागर कर म्य दया दीनस क्षीनस
सिद्धी दित्तम मदमोचन म्य बुद्धिहीनस
ब अद कस वन आरत्य नाद छुक बोज़वुनुय ... ॐश्री

शरण ब आसय च़्यय प्योसय परण पादन
वरम म्य दासस थावतम कन आरत्यन नादन
तरन भवसर च्योन प्रभाव छमव जोनुय ... ॐश्री

छुक सिद्ध योगी ब छुस रूगी दिम म्य दवा
औषध चान्यन पादन हंज़ गरद छ ना
उत्तम छु चूरण सर्व रोगन छु कासवोनुय ... ॐश्री

घटे गाशर चानि दयायि म्य रुगा हटे
मटे छुसय तार म्य भवसर अके वोटे
... अके मोख्य म्य हावतम प्रज़लवोनुय ... ॐश्री

सन्ताप अगन पाप सुत्यन गोमुत [illegible]
शेरस प्यठ थाव कर कमल पनन्य शीतल
सन्ताप चलयम पाप गलयम नो [illegible] तय ओनय ....

सेतार मनुक तार चारिथ स [illegible]
[illegible] यथ ना कुने बोद्ध म्यानि सोय [illegible]
वुच़ म्यानि नज़ान कनन ओज़ान [illegible] ....

करतम स दया [illegible] ज़ [illegible]
छुक बोध द्रष्टि चय [illegible] अन्धन [illegible]
अन्दान छु न्याय चानि दयायि कर उपाय म्योनुय ....

(२)

हा जीव कथ प्यठ मन मामरोवुथ
चय कोन् ज़ोनुथ दात छु दय
अपुज़ मोनुथ त पोज़ रावरोवुथ
पोज़ कोन् मोनुथ सहज़य क्रय
अंद कनि रनिज़थ मन मंदछोवुथ -- चय कोन् ज़ोनुथ दात् छु दय
अस्थिर यि सम्सारद्वोर कवो ज़ोनुथ
दोर ओस दय नाव मोठुय सोरनुय
द्यि सन्ज़ि पयि मन कोन् शामरोवुथ -- चय कोन्
गोर ध्यानस प्यठ अभ्यास कोन थोवुथ
लबहक परमास खतरूक पय
लिबास ममतायि हुन्द कोन त्रोवुथ -- चय कोन्
विषय भूगन व्यर्थ कवो लोगुथ
चयतन भावहख परमय शाय
परम भावुक रस मन कोन चोवुथ -- चय कोन्
वैरागस प्यठ थ्यत कोन् थोवुथ
मनकिस आईनस चलि ही खय
सत भाव ईश्वर कोन परज़नोवुथ -- चय कोन्

अगिन्यानस कोन विवेक थोवुथ
न्यथ प्रावहक सथ स्वभावय
अक्रय अकही कोन मशरोवुथ -- च़्य कोन्
आनन्द बोज़ कोन न्यस्तार प्रोवुथ
निश्चल बनहक आनन्दमय
उदय आत्मा कोना प्रज़नोवुथ -- च़्य कोन्
सतकुय विचार सथ कोन् ज़ोनुथ
गथ प्रावहक सथ स्वभावय
सन्तोषुक फल मन कोन् ख्योवुथ -- च़्य कोन्
स्वतीज़ अगन्यान काठ कोन ज़ोलुथ
अखण्ड करिही सिर्य वोदय
अन्तःकरण कोन् वार शोज़रोवुथ -- च़्य कोन्
वेचार ज़ल सून्य मन कोन् नोवुथ
अद लबहक गरू शब्दुक पय
सथ योगस कोन् अभ्यास थोवुथ -- च़्य कोन्
पांछ प्राण अन्तःकरण कोन रटनोवुथ
अन्तःकरण वार शोद्धहानय
शम दम शब्द भ्रम कोन प्रज़नोवुथ -- च़्य कोन्
सोरूप आत्मुक कोन प्रज़नोवुथ
चलिहि चिन्तुक गछ्नुक भय
मोह न्यन्द्रे मन कोन बुज़नोवुथ .. च़्य कोन्
निष्कल शशिकल ज़ल कोन् चोवुथ
भासि हीन नोछि त्रेश कालुन भय
नाशुन काल अग्न कोन शमरोवुथ .. च़्य कोन्
बहुरूप माया कोन मशरोवुथ, सूक्ष्म रूप प्रावहक आनन्द मय
कर्ता कारणन हनद कोन ज़ोनुथ -- च़्य कोन्
द्वाद शान्त मंडल थान कोन प्रोवुथ, अकही बुछहख तीज़ोमय
सु तीज़ तीज़स कोन मिलनोवुथ -- च़्य कोन्
दा पान सु विचार दोर कोन ज़ोनुथ रोज़िही न संच्यत पोण्य तय पाप
गरू दीन ध्यान सथ कोनन ज़ोनुथ -- च़्य कोन्

परमानन्द जूव

04 TUESDAY ✲ NOVEMBER ③ 1997

गोकुल हृदय म्योन तति चोन गुर्य वान
च्यथ विमर्शी दीप्तिमान भगवानो
वृन्द म्यानि गुपीय च्य्य पत लारान
बन्सरी नाद वाद मतानो
नशारिथ ह्यस त होश मशारिथ पर त पान .. च्यथ॰
अथ वास च्य्य सूत्य रास अस् खेलान
व्यास नारद ति तति आसानो
दास भाव राधा कृष्ण कृष्ण ज़पान -- च्यथ॰
देवी त दीवता सेव च्य्य करान
भवसर तव तार लभानो
ग्यवान रिवान ज्यव छुखन लोसान -- च्यथ॰
असवनि कोसम मोख चानि फोलान
कोस्तौब नज़ि आसि शेहलानो
कोस्तोव त्रटि त माल आसहोय परान -- च्यथ॰
मायायि सूत्यन च शायि शायि आसान
कायायि मंज़ भ्योन न रोज़ानो
सिर्यिक आसन छाया छ्य भासान .. च्यथ॰
आकाश मोख छुख आकाश भासान
तत सत प्रकाश आसानो
देवन हंदि देव प्राणियन हंदि प्रान .. च्यथ॰
युस युथ सोरि तस त्युथ छुक हावान
मोख हाव म्यानि श्री नाराणो
प्रारनाच फुरसत छम न रूज़मन्त्र दान -- च्यथ
युस यी यछितय ती छुय प्रावान
कर्म फल दात च्य्य वखनानो
ध्योन ध्योन पननुय लूक लूकन नहान .. च्यथ॰
क्षमा मूर्खस गाटलि छि करान
गाट ~~क~~ छुकन तव सूत्य प्यवानो
पाठ पुज़ायि मूर्खस यी ज़ान .. च्यथ॰
किन

तगिहेम त ज़गि मंज़ आसहा थ्यकान
वन कस कांसि छुमन व्यपानो
कुन्ज़रच कथ छुय सन्सरस श्रपान .. च्ययथ॰
सिर्यि चंन्द्रम रोस्त ज़ग छा प्रज़लान
भगवान रोस्त प्राण अप्रमाणो
लागहस नित्य नियम रोज़िहम सन्निधान .. च्ययथ॰
दास छिय असि चोन् कोन छुख मानान
लागिज़िन पनन्यन बेगानो
आर छुय ना छि शरण ईवान .. च्ययथ॰
वननचि ज़ेव छुमन वनुन कव ज़ानय
सननचि कथ छा ब्याख आसानो
वनि यस यि पानस सु वनिथ न ज़ानान .. च्ययथ॰
वाकि वाकि वदनस ति वाख छिमन फोरान
साक्ष छुन अन् छ्योत आसानो
चाक गाम जिगरस त आरव छिमन बलान .. च्ययथ॰
छुस न डेंशान बो देशादेश छारान
प्रारान छुसस छुमन ईवानो
पदि लूसिम ति वदि वदि चाडि भरान .. च्ययथ॰
अंत छुन भगवत मायायि आसान
आयायि तति कृत्य छारानो
छारिथ त गारिथ लनिथ त रावान .. च्ययथ॰
गिंदनस रंग रंग तंग छिन ईवान
मंगहय वोति श्री नाराणो
हंग तय मंग रोज़तम संतोष्टान .. च्ययथ॰
हे कृष्ण पाप सानि च्य छुख डेंशान
पाप कास असि असिछि नादानो
क्षमा कर यव पायस छि प्यवान .. च्ययथ॰
भगवत मायायि कांह छुन ज़ानान
तस त्यूथ छु युस युथ छु मानानो
मान अवमान रोस्त चेति मान वति [illegible] मान .. च्ययथ॰

यस नज़ाव कासि तय काह् छुस न ज़्यवान
ज़ीव आन् आन् यस छु ज़पानो
ज़ानि छुसु सोरुय ज़ानि तस कांह् ना .. च़्यथ॰
ब्रह्मा ति च़ोर वीद ह्यत छुन पोशान
तोतनस यूत तस पज़ानो
शेषनाग सासि ज़्यवि सून्य कोल गछान् .. च़्यथ॰
युस ज़ि यूत मंगि तस सुय त्यूत प्रावान
दय नज़ि मनि कुनि आसानो
वो च़्यय अर्पण त च़्यय म्योन आसान .. च़्यथ॰
धन ध्यार पतव त्राविथ छि गछान
भाग्यवान तिम यिमन न आसानो
सन्तोष वूत दिम छिम तिम नव निधान .. च़्यथ॰
सन्तोष वूत दिम छिम तिम नव निधान
तृप्त कर म्य सत स्वरूप ज्ञानो हो
यथावत युथ वो आसहथ वुछान .. च़्यथ॰
दयायि सून्य ओस भगवान वनान
आर्तिस बोडिस तार तारानो
करुना करनावि अपोर तारान .. च़्यथ॰
युस कांह् न तस रूस्त ज़गि मंज़ आसान
पान् वननस त पान् वोज़ानो
सोरुय छु करुवुन पानय आसान .. च़्यथ॰
अमृत मय वाणियि सूत्य वनान
वनि यिनके मोख च़ेवानो
अस्य् अस्य् अस्य् ति सुय, सुय अस्यति आसान .. च़्यथ॰
परमानन्द परम आनन्द छु प्रावान
सूरमुत हानि हानि अरमानो
राधा माता त वव कृष्ण भगवान .. च़्यथ॰

पा~छ त्रिय भागलिसे यथ करारदादस
वादस ज्याद नज़ि कम
फिकिरि हन्दि टोंग मनकिस नागरादस
ज़िकरि नेरि आबि ज़म ज़म
शीरीन पत गोल पान फरहादन --- वादस ज्याद नज़ि कम
करखय गोंगुल नव आबादस
प्रानि हांचि तुलनय न नम
खोद आबाद कर मो प्रार कादस -- "
कमवित करिजि होश दिशि फसादस
ऋषि अमि रशि निशि च़म
कमलियो कमवित वातख स्वादस -- "
च़ख त्राविथ च़ गाव कमादस
नय मंज़ लबख ज़िरो कम
तुल कदम सोम पख वातख मुरादस -- "
गालिथ गरिज़ि फाल किबरि फौलादस
सबर हालि ज़ोर ज़ोर दम
मोखार शाह वात खार औस्तादस -- "
म्य दप्याव वाहव वात्यम दादस
करिहेम छोकन मरहम
यस दिन तस यिन तोरय नादस -- "
दिम कयाह जवाब करिमितस वादस
लोसुन दोह ह्योतनम
गछिहमय बखिशाथ बुछमन अपराधस -- "
दिल साफि छय मर्दि आज़ादस
नन्दस छि बन्दगी कम
फरियाद छुस ब मे वात फरियादस -- "

चाञि आसर आस ईश्वर कर अनाथस प्यठ दया
काम दीव श्री~~श्याम~~ श्यामसोन्दर स्यद्ध म्य करतम कामना
देवकी वसुदेव नन्दन कांह म्य छुम नो च़स्य सिवा
कृष्ण गोन्दर हे मनोहर आरत्यन प्यठ कर दया -- चाञि०
व्याप कोत बो श्राप सूत्यन भारि पापन छिम मटे
वोन म्य छुम नो ओन गोमुत छुस क्रोधचि अनि गटे
सुन गछुन तय ज़्योम मरुन जोनुम मा म्य प्रथ लटे -- ,,
तप सोरुम नो ज़प सोरुम न दफत कथ क्युत ज़ास बो
यच़ अधर्मी छुस कुकर्मी बनत कथ कयुत आस बो
आस आशावान कर तल दास कव छुस उदास बो -- ,,
च़य छिहम माता पिता भ्राता त दाता बान्धवुय
च़य छिहम ईश्वर महेश्वर च़य महीशो केशवुय
चांडि भरिम वदि वदि म्य अनतम ददिमतिस मूलस ज़ुवुय -- ,,
यथ जन्मस पाठ पूज़ा चाञ्य ज़ांह ज़ानी न म्य
वथ म्य रावम सथ असथ ज़ोनुम न कथ मानी न म्य
बोद्ध पनञि ज़ांह शोद्ध करम नो मल निशि कानी न म्य -- ,,
यन्द्र आल्यव हन्दरोवुस, अन्दर् गजि छुम न सन्धरान
छन्दरोवनस मोह न्यन्द्र् वुज़नस छुम नमन पचान
ज़ांह करम न प्रदिक्षण चान्यन शिवालन मन्दरन -- ,,
छुस पथर प्योमुत म्य थर छुम नर कनि नारची
ध्यान धारण चाञि म्य आसम कुंज़ ~~स~~ स्वर्गीय द्वारची
छुम ना मोकलन वात वथा फासि छम संसार ची -- ,,
श्रीपती श्री राम लक्ष्मण निशबोध्यन प्यठ कर दया
 छुसथ दोखव दादय्व बु चोटमुत सोख लभय नो अख दमा
छुख च़ परमानन्द पोने सत्गरु परमात्मा ,,

(6)

कष्ट कास्तम भगवान हेरे - सन्तुष्ट रोज़तम गरि गरि
भ्रमचे वुनिरे वुनिरोवुस - मोह छटि अत्रि घटि वति रोवूस
च्यय रोस्त कुस म्य अथरोटकरे -- कष्ट॰
भव सर क्रमनय रोटनम खोर - ज़ोरावार आसिथ गोस कमज़ोर
छांबरि लोगमुत छुस बांबेर -- कष्ट कास्तम॰
वेरि बो लागय शेरि पम्पोश - गद गद वाणीयन थावतम गोश
वदि वदि यच छुम म्यच मा हेरे -- कष्ट
संकट मंज़ तस प्रह्लादस - कन थोवथस आर्वरि नादस
हिरिणाकशपस अद मद उतरे -- कष्ट
हंग आख द्रौपदी नंगरछतस - नंग वुछनुक तस सामर्थ कस
रंग रंग आवरण नालि तस हुरे -- कष्ट
लक्ष्मणो छारून परमानन्द - चराचर युस पोशि अंद वंद
